॥ श्री जिनाय नमः ॥

# (गूर्जर भाषांतर सहितं)

# ॥ श्री मृगांक चरित्रं प्रारभ्यते ॥

(करता-श्री ऋधिचंद्रजी)

छापी प्रसिध्ध करनार-विठलजी हीरालाल लालन (जामनगरवाळा)

आ पुस्तक पोताना भास्करोदय प्रेसमां छाप्युं

Serving JinShasan
086647
gyanmandir@kobatirth.org

Acharya Shri Kailassagarsuri Gyanmandir / Jun Gun Aaradhak Trust

॥ श्री जिनाय नमः ॥

(गूर्जरभाषांतरसहितं)

# ॥ श्री मृगांकचरित्रं प्रारभ्यते ॥

(कर्ता—श्रीऋद्धिचंद्रजी)

छापी प्रसिद्ध करनार—विठलजी हीरालाल लालन--(जामनगरवाळा)

श्रीपार्श्वः प्रत्यहं जीयात् स श्रीमान् वसुधातले । प्रोद्यद्गुणालिसद्धाम पार्श्वसेवितपार्श्वकः ॥ १ ॥
यो ददाति महद्भद्रं भव्यानां भीतिभञ्जनः । भास्वद्भानुसमाकारो निजवंशमरुत्पथे ॥ २ ॥ युग्मं ॥

अर्थः—सकल गुणना धाम, पार्श्व नामना यक्षथी सेवायेलां छे पडखां जेना, भव्यात्माओनी भीतिने भांगवावाळा, महान् कल्याणकारी, पोताना वंशरुपी आकाशमां देदीप्यमान सूर्यसमान एवा श्रीमान् पार्श्वप्रभु हमेशां जयवंता वर्तो ? ॥१–२॥

भारति! भारतीं स्फारां दद्यास्त्वमेव सत्वरम् । सुराणामपि शर्मौघप्रदामेवामृतप्रभाम् ॥ ३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—हे सरस्वति! देवताओने पण सुखना समूह आपनारी, अमृत जेवी अने विस्तारवाळी एवी वाणी तुं मने तुरत आप? ॥ ३ ॥



सच्चरित्रं मृगाङ्कस्य करिष्येऽहं जनप्रियम्। नत्वा स्वगुरुपादाब्जं निर्मलद्युतिभासुरम् ॥ ४ ॥

अर्थः—निर्मल कांतिथी देदीप्यमान एवा पोताना गुरुमहाराजना पदकमलने नमीने सज्जन-प्रिय एवुं मृगांकनुं चरित्र हुं करीश. ॥ ४ ॥ ગુરૂનાબહુમાનતરીકે શિષ્યોની ફરજ } અજ્ઞાન તિમિર અંધાનામ્૦॥ સર્વાશિષ્ટ પણ સામ૦॥ =

जम्बूद्वीपेऽत्र भरतक्षेत्रं विश्वविभूषणम्। नदीपर्वतसद्ग्रामद्रङ्गश्रेणिसमन्वितम् ॥ ५ ॥

अर्थः—आ जंबूद्वीपमां जगत्‌ना भूषणसमान नदी, पर्वत, सारां गाम तथा सुंदर शहेरोना समुदाये करी युक्त एवुं भरतक्षेत्र छे. ॥ ५ ॥

तत्रास्ति नगरी रम्या वाराणसी जनाकुला। प्रोत्तालवप्रपरिखा वापीकूपसरोऽन्विता ॥ ६ ॥

अर्थः—ते भरतक्षेत्रमां सुंदर, जन-समूहथी अलंकृत तथा उंचा किल्लाओ, खाइओ, वावो, कुवाओ अने सरोवरोथी युक्त एवी वाराणसी नामे नगरी हती. ॥ ६ ॥

विहारवर्णवामाङ्गीवाग्मीवारणवाजिभिः। वणिग्वाचंयमवृन्दवैद्यैश्च परिशोभिता ॥ ७ ॥ यतः—



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

अर्थः—वळी ते नगरी बगीचाओथी, अढारे वर्णथी, स्त्रीओथी, वक्ताओथी, हस्तिओथी, घोडाओथी, वणिकोथी, मुनिवृंदोथी अने वैद्योथी अत्यंत शोभती हती. ॥ ७ ॥ कह्युं छे के—

**वापीवप्रविहारवर्णवनिता वाग्मी वनं वाटिका, वैद्यो विप्रकवारिवादिविबुधा वेश्या वणिग् वाहिनी। विद्या वीरविवेकवित्तविनया वाचंयमा वल्लिका, वस्त्रं वारणवाजिवेसरवरं राज्यं च वैः शोभते ॥ ८ ॥**

अर्थः—वाव, किल्ला, बाग, अढारे वर्ण, स्त्रीओ, वक्ता, वन, वाडी, वैद्य, विप्र, जळाशयो, पंडितो, वेश्या, वणिक्, सेना, विद्या, वीर, विवेक, धन, विनय, मुनिवर, नटीओ, वस्त्र, हाथी, घोडा, खच्चर विगेरेथी राज्य शोभे छे. ॥ ८ ॥

**राज्यं चकार तस्यां सद् मकरध्वजभूपतिः। रूपेण जितकन्दर्प्पः प्रतापाक्रान्तभास्करः ॥ ९ ॥**

अर्थः—त्यां प्रतापे करीने दबावेलो छे सूर्यने जेणे, अने रुपे करीने कामदेवने जीत्यो छे जेणे एवो मकरध्वज नामे राजा राज्य करतो हतो. ॥ ९ ॥

**न्यायवल्लीपयोवाहः कामधर्म्मार्थतत्परः। विशुद्धकुलसम्भूतः शस्त्रशास्त्राब्धिपारगः ॥ १० ॥**

अर्थः—ते राजा न्यायरुपी वेलडीने पोषण करवामां मेघसमान, धर्म अर्थ अने काममां तत्पर, विशुद्ध कुळमां उत्पन्न थयेलो अने शस्त्र तथा शास्त्ररूपी समुद्रनो पारंगत हतो. ॥ १० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्करो यस्य देशेषु बन्धनं नास्ति कुत्रचित् । रोगश्शोककरश्चैव भयं वैरं परस्परम् ॥ ११ ॥

अर्थः—जेना देशमां तस्कर, बंधन, रोग, शोक, कर, भय अने परस्पर वैरभाव विगेरे कंइ नहोतुं. ॥ ११ ॥

सचिवस्तस्य विख्यातो वर्त्ततेस्म महीपतेः । सुबुद्धिरिति नाम्ना हि कुशाग्रबुद्धिऋद्धिभृत् ॥ १२ ॥

अर्थः—ते राजाने कुशाग्र बुद्धिवाळो अने सुप्रसिद्ध एवो सुबुद्धि नामे प्रधान हतो. ॥ १२ ॥

राज्यभारधरो नित्यं सर्वशास्त्रविशारदः । परचित्तस्य सङ्कल्पज्ञाता भोग्यकभोगकः ॥ १३ ॥

अर्थ—वळी ते प्रधान राज्यभारने हमेशां वहन करवावाळो, सर्व शास्त्रमां पारंगत, परना हृदयने जाणवावाळो तथा भोग्य वस्तुने भोगवनारो हतो. ॥ १३ ॥

निम्नसागरगम्भीरो बुद्ध्या च धीषणोपमः । समग्रगुणसंयुक्तो जनानां मोहकारकः ॥ १४ ॥

अर्थः—वळी ते प्रधान महान् सागरजेवो गंभीर, बुद्धिमां बृहस्पति जेवो अर्थात् सर्व गुणोए करी सहित एवो लोकोने मोह पमाडनारो हतो. ॥ १४ ॥

तस्य राज्ञः प्रिया रेजे नाम्ना मदनवल्लभा । समग्रगुणमञ्जूषा रूपेण मदनप्रिया ॥ १५ ॥

अर्थः—ते राजानी सर्व गुणनी पेटीरुप तथा रुपें करी रतिजेवी मदनवल्लभा नामे प्रिया शोभती हती. ॥ १५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्या वदनमाभाति रजनीशसमप्रभम् । सुधौतधामसद्धाम पद्मपत्रसुलोचनम् ॥ १६ ॥

अर्थः—तेणीनुं वदन चंद्रमानी कांतिजेवुं तथा अमृतना भाजनसरखुं तेजस्वी अने पद्मपत्र जेवां छे लोचन जेनां एवुं शोभतुं हतुं. ॥ १६ ॥

सा भाति भुवने रम्या शीलेन जनकात्मजा । सर्वशृङ्गारसंयुक्ता चातुर्यगुणशोभिता ॥ १७ ॥

अर्थः—वळी तेणी सर्व प्रकारना शृंगारथी संयुक्त, चातुरीथी शोभिती तथा शीलथी सीतानीपेठे महेलमां शोभती हती. ॥

तस्याः सूनुः सदा रेजे रूपसुन्दरनामतः । विनयादिगुणाधारः समग्रसुकलान्वितः ॥ १८ ॥

अर्थः—तेणीनो विनयादि गुणोवाळो तथा सर्व उत्तम कळाओथी युक्त एवो रुपसुंदर नामे पुत्र हमेशां शोभतो हतो. ॥

रूपेण जितदेवेन्द्रः शस्त्रविद्याविभूषितः । शास्त्रालङ्कारशिल्पज्ञः प्रसिद्धबुधसेवितः ॥ १९ ॥

अर्थः—वळी रुपवडे करीने देवेंद्रने पण जीतवावाळो, शस्त्रविद्याथी अलंकृत, शास्त्रालंकार तथा शिल्पकळा जाणवावाळो ते कुमार प्रसिद्ध पंडितोथी सेवित हतो. ॥ १९ ॥

तस्य शरीरमाभाति रम्भागर्भातिकोमलम् । लसल्लक्षणसंयुक्तं कल्याणविमलद्युति ॥ २० ॥

अर्थः—ते कुमारनुं शरीर केळना गर्भसमान कोमळ, देदीप्यमान गुणोथी संयुक्त अने सुवर्णना जेवी कांतिवाळुं शोभतुं हतुं. ॥ २० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्यां वसति दाता हि श्रेष्ठी कुसुमसारकः । परिवारेण संयुक्तः विख्यातः क्षितिमण्डले ॥ २१ ॥

अर्थः — ते नगरमां परिवारथी वींटलायेलो अने जगत्मां सुप्रसिद्ध तथा खरेखर दानेश्वरी एवो कुसुमसार नामे शेठ वसतो हतो. ॥ २१ ॥

जनव्रजेषु कल्पद्रुर्द्रव्येण धनदोपमः । धर्मकर्मविधौ दक्षः रूपेण रतिवल्लभः ॥ २२ ॥

अर्थः—वळी ते शेठ माणसोना समूहमां कल्पवृक्षजेवो, द्रव्यमां कुबेरजेवो, धर्मकार्यमां दक्ष अने रुपमां कामदेवजेवो हतो. ॥ २२ ॥

तस्यास्ति रमणी रम्या स्वयंप्रभाभिधा शुभा । केलीवत्कोमलाङ्गी च कलाकलापधारिका ॥ २३ ॥

अर्थः—ते शेठनी कदलीजेवा कोमळ अंगवाळी अने शुभ कळाओमां पारंगत तथा सुंदर स्वयंप्रभा नामे पत्नी हती.

विराजते मुखं तस्या विकस्वरकजप्रभम् । सद्दन्तनयनैर्युक्तमर्चितं जनदृक्कजैः ॥ २४ ॥

अर्थः —तेणीनुं मुख दांत अने चक्षुथी युक्त विकस्वर कमळना जेवुं माणसोनी दृष्टिरुपी कमळोथी अर्चित थयुं थकुं शोभतुं हतुं. ॥ २४ ॥

तस्याः कुक्षौ समुत्पन्नो मृगाङ्को मृगनेत्रजित् । गत्या तार्जितमत्तेभो वक्त्रेण यामिनीपतिः ॥ २५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—तेणीनी कुक्षिथी नेत्रोवडे मृगने जीततो, गतिथी मत्त हस्तिनो तिरस्कार करतो अने चहेराए करी चंद्रमाने हरावतो मृगांक नामे पुत्र उत्पन्न थयो. ॥ २५ ॥

वृद्धिं प्राप कुमारोऽसौ यावदेवाष्टवार्षिकः । मुक्तः पित्रा गुरूपान्ते कलाग्रहणहेतवे ॥ २६ ॥ यतः—

अर्थः—अनुक्रमे वृद्धि पामीने ए कुमार ज्यारे आठ वर्षनो थयो त्यारे पिताए कळा शीखवा माटे तेने गुरुपासे मोकल्यो. ॥ २६ ॥ केमके—

माता शत्रुः पिता वैरी येन बालो न पाठितः । न शोभते सभामध्ये हंसमध्ये बको यथा ॥ २७ ॥

अर्थः—जे माता पिता बालकने भणावता नथी ते शत्रु समजवा, कारणके हंसना टोळामां जेम कागडो तेम ते अपठित बाळक पण शोभतो नथी. ॥ २७ ॥

लालयेत् पञ्च वर्षाणि अष्ट वर्षाणि पाठयेत् । प्राप्ते तु षोडशे वर्षे पुत्रं मित्रं समाचरेत् ॥ २८ ॥

अर्थः—पुत्रनुं पांच वर्ष सुधि लालन करवुं, आठमे वर्षे अभ्यास कराववो अने शोळ वर्षनो ज्यारे पुत्र थाय त्यारे मित्रनी समान गणवो. ॥ २८ ॥

अथ तत्रैव नगरे धनञ्जयो महर्द्धिकः । वसति प्रमदा तस्य प्रिया धनवती शुभा ॥ २९ ॥

अर्थः—हवे तेज नगरमां एक धनंजय नामे शेठ रहेतो हतो, तेने धनवती नामे सुंदर पत्नी हती. ॥ २९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तयोः पुत्री गुणश्रेणिः पद्मावती कजेक्षणा। तद्दिने सापि मुक्ता च पठनाय निरालसा ॥ ३० ॥

अर्थः—तेओनी गुणनी श्रेणि रुप अने कमलिनी जेवा चक्षुवाळी पद्मावती नामे पुत्री हती. तेणीने पण तेज दिवसे त्यांज भणवा मोकली ॥ ३० ॥

पद्मावतीमृगाङ्कौ तौ कलाभ्यासं प्रकुर्वतः। क्षीरनीरनिभा नित्यमासीत्प्रीतिस्तयोर्मिथः ॥३१॥ यतः—

अर्थः—कलाभ्यास करतां पद्मावती अने मृगांक वच्चे परस्पर क्षीर अने नीरनी पेठे प्रीति थइ. ॥ ३१ ॥ केमके—

"पय पानी उपर मिले अंतर मिलो नहीर। किं उमराल नीरह तजी किं उ गही पीइ सुषीर ॥३२॥

षीरवारि स्युं प्रीति अति इह जानत सब कोय। करत जुदाई हंसखल खलथिं कहा न होय"? ॥३३॥

अर्थः—खीर अने नीर साथे मळेल होय तेमां पण हंस छे ते नीरने तजीने खीर पी जाय छे. खीर अने नीरनी प्रीति अति छे एम सहु कोइ जाणे छे, पण खल एवो हंस जूदा करे छे, केमके खलथी शुं नथी थतुं? ॥ ३२–३३ ॥

एकस्मिन्समये तस्मिन्ननध्यायः समागतः। छात्रपठनशालायां स्थिता पद्मावती स्वयम् ॥ ३४ ॥

अर्थः—एक दिवसे रजानो दिवस आव्यो त्यारे ते शाळामां मात्र पद्मावती एकली बेठी हती. ॥ ३४ ॥

पुत्रः कुसुमसारस्य क्रीडां कर्तुं गृहे गतः। स्मृत्वा पद्मावतीं चित्ते चलितः स्नेहनोदितः ॥ ३५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते समये कुसुमसार शेठनो पुत्र मृगांक क्रीडा करवाने घरे गयेलो त्यांथी पद्मावतीने संभारीने स्नेहथी स्फुरित थयो थको चाल्यो. ॥ ३५ ॥

व्रजन् मार्गे च मिलितः धनञ्जयो धनैर्भृतः । अशीतिकपर्दान् तस्मै स ददौ स्वसुताकृते ॥ ३६ ॥

अर्थः—मार्गे चालतां धनवान् शेठ धनंजय मल्या, तेणे मृगांकने एंसी कोडीओ पोतानी पुत्री पद्मावती माटे आपी.

गृहीतस्तेन कूष्माण्डपाको वर्त्मनि गच्छता। कथयिष्यति सा किं मामिति विचिन्त्य भक्षितः ॥३७॥

अर्थः—रस्ते चालतां ते कोडीओ वेचीने मने ते शुं कहेवानी हती एम विचारीने कोळां-पाक लइने खाइ गयो. ॥३७॥

पद्मावतीसमीपे स भक्षयित्वा गतस्ततः। तया प्रश्नः कृतस्तस्य, भक्षितं भोस्त्वयाद्य किम् ? ॥३८॥

अर्थः —ते खाइने पद्मावती पासे गयो त्यारे तेणीए पूछ्युं के अरे! तें आजे शुं खाधुं छे ? ॥ ३८ ॥

कुमारस्तामुवाचैवं दत्ताशीतिकपर्दकाः । तव पित्रा त्वदर्थं च मम हस्तेऽतिरागतः ॥ ३९ ॥

अर्थः—त्यारे कुमारे कीधुं के तारा पिताए स्नेहथी मने तारा माटे एंसी कोडी आपेल, ॥ ३९ ॥

विक्रीय तान् मया सर्वान् लात्वा कूष्माण्डपाककम्। भक्षितः स्वादतो नूनं भुक्त्वा चाहमिहागतः ॥

अर्थः—ते सर्व कोडीओ वेचीने में कोळां-पाक लीधो अने स्वादपूर्वक खाइने हुं अहिं आव्यो छुं. ॥ ४० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

કહ્યું છે કે—મિત્રતા વધારવાના છ કારણો છે—ખાવું ને ખવરાવવું—આપવું અને લેવું—સુખ દુ:ખની વાત કહેવી અને સાંભળવી=

तत् श्रुत्वा कुपिता सा चोवाच वक्त्रेण तत्पुरः । नैतत् कार्यं हि मित्राणामेकाकित्वेन भोजनम् ॥

अर्थः—ते सांभळीने कोपातुर थइ थकी रोषयुक्त मुखथी तेणी बोली के एकांकी भोजन करी लेवुं ते मित्रनुं कार्य नथी.

पश्चादुवाच सा बाला मृगाङ्ककुमरं प्रति । पुनः किं ते मया वाच्यं स्वोदरं भरितं त्वया ॥ ४२ ॥

अर्थः—वळी तेणीए मृगांककुमारने कीधुं के पोतानुं पेट भरीने हवे तुं मने कहे छे, तेम ॥ ४२ ॥ આવા એકલ પેટા અને પેટભરા માટે કહ્યું છે કે-

દગાથા સોલ૦ ખાગાયા સો૦

भक्ष्यलेशोऽपि मह्यं च न दत्तस्त्वयकाऽधम !। शिक्षां ददामि किं ते च नूनं मैत्र्यात् पुनः पुनः ॥

अर्थः—वळी हे अधम! जरा पण खावानुं मने न आप्युं तेथी खरेखर हवे तने मित्रता होवाथी शुं शिक्षा करुं? ॥४३॥

यदा भवन्ति मत्पार्श्वे कपर्दाः कुमर ! श्रृणु । तदाहं भूषणं रम्यमकार्षं कर्णकुण्डलम् ॥ ४४ ॥

अर्थः—जो मारा पासे ते कोडीओ होत तो हे कुमार! सांभळ? के हुं तेना कानना सुंदर कुंडलो करावत. ॥ ४४ ॥

श्रुत्वेति वचनं तस्याः खेदखिन्नोऽभवच्छिशुः । अनया मयि मित्रत्वं साम्प्रतं न विचारितम् ॥४५॥

अर्थः—एम सांभळीने ते मृगांककुमार खेदवान् थयो थको विचारवा लाग्यो के आ मारी मित्रतानो हाल विचार करी शके तेम नथी. ॥ ४५ ॥

विमृश्येत्येव स शावो मौनं कृत्वा स्थितस्ततः । भविष्यति मदायत्ता शिक्षां दास्ये यदा तदा ॥४६॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मृगांक

अर्थः—एम विचारीने मृगांककुमारे मौन रहीने विचार्युं के ज्यारे ते मारी थशे त्यारे तेणीने शिक्षा आपीश. ॥४६॥ चरित्रम्

इति चिन्तयतः प्रीतिर्बभूव मनसा विना । कलाकुशलतां सम्यक् तौ प्राप्तौ गुरुभक्तितः ॥ यतः—

अर्थः—एवी रीते तेओ वच्चे मन विनानी प्रीति थइ, अने गुरुभक्तिथी तेओ बन्ने सारीरीते कळा-कुशळ थया.

॥११॥

॥ ४७ ॥ कह्युं छे के- સજ્જન હોશે પ્રેમકી, મત તોડો તૂટ જાય; ॥ સજ્જન સજ્જન મેં [illegible], સજ્જન કે મન ઔર; ॥

"वातिं कीइं कवण गुण जिहां नवि मलिउं मन्न । मन्नविहुणो प्रेमरस जाणे अलुणो अन्न ॥४८॥

अर्थः—ज्यां मन नथी मल्युं त्यां वात करवाथी शुं ? केमके मनविनानो प्रेम ते लुण विनानी रसवती जेवो थाय छे.

मनु तोलो तनु ताजवी हे सखी ! नेह केता मण होय । लंगते लेखुं नहीं टूटइ टांक न होय" ॥

अर्थः—हे सखि ! मनरुप तोलांथी तनरुप कांटामां स्नेहने तोळीए तो केटला मण थाय ? लाखे लेखुं नहिं, पण स्नेह टुटथे एक टांक पण थाय नहिं. ॥ ४९ ॥

पद्मावतीमृगाङ्कौ तौ स्वस्वधाम्नि गतावुभौ । पठित्वा सर्वशास्त्राणि गुरुनिर्देशतो मुदा ॥ ५० ॥

अर्थः—बाद पद्मावती अने मृगांककुमार सर्व शास्त्रोनो अभ्यास करीने गुरुनी रजा लेइने हर्षथी पोतपोताने घेर गया. ॥११॥

क्रमेण यौवनं प्राप कुमारः कमलेक्षणः । पिता तस्य कृते कन्यां लोकयामास तत्पुरे ॥ ५१ ॥

P.P. Ac. Gunratnasuri M.S.                Jun Gun Aaradhak Trust

अर्थः—अनुक्रमे कमलजेवी चक्षुओवाळो मृगांककुमार यौवनवय पाम्यो, त्यारे तेनो पिता तेना माटे ते नगरमां कन्यानो शोध करवा लाग्यो. ॥ ५१ ॥

**एकस्मिन् दिवसे श्रेष्ठी पद्मावतीं ददर्श च । समग्रगुणमञ्जूषां शीलालङ्कारधारिणीम् ॥ ५२ ॥**

अर्थः—एक दिवसे शेठे सर्व गुणनी पेटीरुप अने शीलरुपी अलंकारने धरवावाळी पद्मावतीने दीठी. ॥ ५२ ॥

**धनञ्जयसमीपे स स्वाङ्गजार्थं ययाच ताम् । कुमारसदृशां चैव वयसा विद्यया गुणैः ॥ ५३ ॥**

अर्थः—अने धनंजयनी पासे पोताना पुत्र मृगांककुमार माटे वयथी, विद्याथी अने गुणथी योग्य ते पद्मावतीनी याचना करी. ॥ ५३ ॥

**धनञ्जयस्तद्वचनमङ्गीचकार निश्चितम् । शुभं मुहूर्त्तमालोक्य विवाहः क्रियते ध्रुवम् ॥ ५४ ॥**

अर्थः—धनंजयशेठे पण तेनुं वचन अंगीकार करीने शुभ मुहूर्त जोइने विवाह करवानो निश्चय कर्यो. ॥ ५४ ॥

**तयोः शुभेऽह्नि विप्रेण विवाहस्तत्र मेलितः । पञ्चशब्दादिवादित्रैः गीतनृत्यैः पुरस्सरम् ॥ ५५ ॥**

अर्थः—बाद ब्राह्मणे शुभ दिवस जोइने तेओनो विवाह मेळव्यो. अने पंचशब्दादि वाजित्रो वागते तथा गीत अने नृत्य थते छते, ॥ ५५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गजतुरगसङ्घातैः सुखासनैश्च सध्वजैः । याचकव्रजसद्दानैः तूर्यसन्दोहसुन्दरैः ॥ ५६ ॥

अर्थः—हाथी, घोडा, सुखपाल अने उत्तम ध्वजाओवाळा वाहनोथी युक्त, याचकोना समूहने दान देते छते, अने सुंदर एवी शरणाइओ वागते छते, ॥ ५६ ॥

अनेकोत्सवसन्दोहैश्चक्रतुः श्रेष्ठिशेखरौ । तयोर्नूनं शुभे लग्ने पाणिग्रहणमद्भुतम् ॥ ५७ ॥ युग्मम् ।

अर्थः—इत्यादि अनेक उत्सवोथी ते श्रेष्ठिवर्योए तेमनुं शुभ लग्ने अद्भुत एवुं पाणिग्रहण कराव्युं. ॥ ५७ ॥

कृतोद्वाहं मनोऽभीष्टं समानीता स्वसद्मनि । हर्षं प्रापेति स शावः फलितं मम वाञ्छितम् ॥ ५८ ॥

अर्थः—मन इच्छित विवाह करीने तेणीने पोताने घरे लावीने मृगांककुमार हर्षित थयो थको विचारवा लाग्यो के मारुं वंछित फल्युं खरुं. ॥ ५८ ॥

तावेव दम्पती तत्र भोजयामासतुः सुखम् । प्रसुप्तावेकदा स्वैरं रजन्यां सप्तमे गृहे ॥ ५९ ॥

अर्थः—बाद एक दिवसे तेओ बन्ने सुखेथी भोजन करीने रात्रिए सातमी मेडीए सुता हता. ॥ ५९ ॥

मृगाङ्को वचनं तस्याः सस्मार हृदि तत्क्षणे । मारयाम्यहमेनां किम् अबलां बलवर्जिताम् ॥ ६० ॥

अर्थः—ते वखते मृगांककुमारने तेणीनुं वचन याद आववाथी ते विचारतो हवो के आ बलरहित एवी अबलाने हुं शुं मारुं? ॥ ६० ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गच्छाम्यपरदेशेष्वेनां मुक्त्वाऽत्रैव साम्प्रतम् । येनैषा लभते सद्यः स्वकीयवचसः फलम् ॥ यतः-

अर्थः—पण हाल तो तेणीने अत्रेज मूकीने हुं परदेश जउं, के जेथी पोताना वचननुं फल तेणीने मळे. कह्युं छे के-

आज्ञाभङ्गो नरेन्द्राणां गुरूणां मानमर्द्दनम् । पृथक् शय्या च नारीणामशस्त्रवध उच्यते ॥ ६२ ॥

अर्थः—राजानी आज्ञानो भंग, गुरुनुं अपमान अने स्त्रीथी जुदी शय्या ते शस्त्र विनानो वध कहेवाय छे. ॥ ६२ ॥

आपृच्छ्य पितरौ प्रातर्मृगाङ्को गमनोत्सुकः । चकार पोतसामग्रीं वाणिज्यार्थं च सत्त्ववान् ॥ यतः-

अर्थः –व्यापारार्थे परदेश जवाने उत्सुक बलवान् एवो मृगांककुमार सवारमां मात-पिताने पूछीने वहाणनी तैयारी करवा लाग्यो. ॥ ६३ ॥ केमके—

लक्ष्मीर्वसति वाणिज्ये किंचिदस्ति च कर्षणे । अस्ति नास्ति च सेवायां भिक्षायां न कदाचन ॥६४॥

अर्थः—लक्ष्मी वेपारमां वसे छे, अने थोडी खेतीमां रहे छे, सेवामां छे अने नहिं, पण भिक्षामां कोइ दिवस रहेती नथी. ॥ ६४ ॥

प्रत्युवाच मृगाङ्कस्तामिति मे वचनं कुरु । भद्रे ! त्वयात्र स्थातव्यं देशान्तरे व्रजाम्यहम् ॥ यतः-

अर्थः—बाद मृगांककुमारे पोतानी स्त्री पद्मावतीने कीधुं के हे भद्रे! हुं परदेश जाउं छुं तारे अहिं रहीने हुं कहुं ते करजे? ॥ ६५ ॥ कह्युं छे के-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वधी हદયुछेद - देशाटननेपंडितनमन्प्रेम -

दीसइ विविहचरिअं जाणिज्जइ सज्जणदुज्जणविसेसो। अप्पाणं च कलिज्जइ हिंडिज्जइ तेण पोहवीए॥

अर्थः—पृथ्वीपर फरवाथी विविध प्रकारनां चरित्रो जोवाय, सज्जन अने दुर्जन समजी शकाय अने पोतानुं पराक्रम फोरवी शकाय. ॥ ६६ ॥

गृहकार्यं च कर्तव्यं शोभां रक्षेस्ततः पराम्। सुभ्रु! कार्या त्वया पित्रोर्भक्तिर्देवगुरौ तथा ॥ ६७ ॥

अर्थः—तारे घर–काम करवुं, शीयलने साचववुं अने हे सुभ्रु! तारे मात–पितानी तथा देवगुरुनी भक्ति करवी. ॥६७॥

आकर्ण्य वचनं तस्य प्रत्यूचे निजवल्लभम्। आगमिष्ये भवत्सार्धं छायेव वपुषः सदा ॥ ६८ ॥

अर्थः—ए प्रमाणे मृगांककुमारनां वचन सांभळीने तेणी कहेवा लागी के, हुं तो छायानी पेठे आपनी साथेज आवीश.

गृहे स्थातुं न युक्तं हि योषितां पतिना विना। प्राणान्ते न हि मुञ्चामि समीपं भवतस्ततः ॥६९॥

अर्थः—कारणके स्त्रीओने पति विना घरे रहेवुं युक्त नथी, माटे प्राणांत सुधि तमाराथी हुं खसीस नहि. ॥ ६९ ॥

तया सार्धं मृगाङ्कोऽसौ प्रणम्य चरणं पितुः। अम्बुधौ यानपात्रं च व्यारुरोह शुभे दिने ॥ ७० ॥

अर्थः—बाद मृगांककुमार तेणीने साथे लेइने मात–पिताने नमस्कार करीने शुभ दिवसे समुद्रमां रहेला वहाणमां बेठो. ॥ ७० ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्चचाल पोतस्थो मृगाङ्को जलवर्त्मनि । क्रीडां कुर्वन् तया सार्धमनेकगुणसंयुतः ॥ ७१ ॥

अर्थः—अने जल–मार्गमां गुणवान् एवो मृगांककुमार पद्मावतीनी साथे विविध प्रकारनी क्रीडा करतो आगळ चाल्यो.

क्रमेण राक्षसद्वीपं तरण्डः प्राप तस्य सन् । तं द्रष्टुं रक्षितस्तत्र मृगाङ्केनैव लीलया ॥ ७२ ॥

अर्थः—अनुक्रमे ते वहाण राक्षसद्वीप आगळ आव्युं, त्यां सहेज जोवा माटे मृगांककुमारे वहाणने थोभाव्युं ॥७२॥

उत्तेरुः पोततः सर्वे चक्रुः कार्याणि ते जनाः । केचिद् गीतानि गायन्ति केचित् क्रीडन्ति निर्भरम् ॥

अर्थः—वहाणमांथी बधा माणसो उतर्या, तेमां कोइ गीतो गावा लाग्या, कोइ स्वेच्छापूर्वक क्रीडा करवा लाग्या, अर्थात् सर्व माणसो इच्छानुसार कार्यो करवा लाग्या. ॥ ७३ ॥

आनयन्ति जलं केचित् केचित् कुर्वन्ति भोजनम् । केचित् स्नानं प्रकुर्वन्ति दीर्घिकासु विशेषतः ॥

अर्थः—कोइ जल लाव्या, कोइ भोजन करवा लाग्या, कोइ वावमां विशेष प्रकारे स्नान करवा लाग्या. ॥ ७४ ॥

केचिद् बन्धून् समाहूय दर्शयन्ति च कौतुकम् । इत्यादिक्रीडया सर्वे तिष्ठन्ति तत्र निर्भयम् ॥७५॥

अर्थः—कोइ मित्रोने बोलावीने कौतुक बताववा लाग्या, इत्यादि क्रीडाओ करता सर्वे माणसो भयरहित थया थका त्यां रह्या. ॥ ७५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उत्ततार मृगाङ्कोऽपि कान्तया कान्तया युतः । दर्शयित्वा वनं सर्वं सुष्वाप केलिमन्दिरे ॥ ७६ ॥

अर्थः—मृगांककुमार पण पोतानी स्त्रीसहित वननुं निरीक्षण करीने केळनो मंडप बनावीने सुतो. ॥ ७६ ॥

घोरनिद्रां वधूं दृष्ट्वा कुमारश्चोत्थितस्ततः । स्मृत्वा च वचनं पूर्वं मन्युनाऽरुणलोचनः ॥ ७७ ॥

अर्थः—बाद पद्मावतीनुं वचन याद करीने क्रोधथी लाल आंखोवाळो थयो थको तेणीने घोर निद्रावाळी जोइने मृगांककुमार उठ्यो. ॥ ७७ ॥

मध्यरात्रौ प्रगतायां लेखाऽशीतिकपर्दकान् । प्रबध्ध्वा च मृगाङ्केन पद्मावत्यञ्चले ततः ॥ ७८ ॥

अर्थः—अने मध्यरात्रि गयाबाद एंसी कोडीओ लेख सहित पद्मावतीना वस्त्रने छेडे बांधी ॥ ७८ ॥

तल्लेखे लिखितं तेन मयोदरं च पूरितम् । अथैतान् कपर्दान् भद्रे ! गृहीत्वा कुरु भूषणम् ॥७९॥

अर्थः—ते लेखमां तेणे लख्युं के हे भद्रे ! एंसी कोडीथी में तो पेट भर्युं, पण हवे ते कोडीओथी तुं काननुं भूषण करजे ? ॥ ७९ ॥

स्वप्रियां तत्र मुक्त्वा च चलितः पोतसन्मुखम् । पूत्कारमिति चक्रे स राक्षसैर्भक्षिता वधूः ॥८०॥

अर्थः—एवी रीते पोतानी प्रियाने त्यांज मूकीने पोते वहाणपासे आवीने पोकार करवा लाग्यो के मारी स्त्रीने राक्षसे खाधी. ॥ ८० ॥ ॥१७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हक्कारितं मृगाङ्केनोपविश्य पोतमद्भुतम् । क्रमेण गच्छता मार्गे संजातस्तपनोदयः ॥ ८१ ॥

अर्थः – बाद पोते वहाणमां बेसोने वहाण हंकार्युं, क्रमे क्रमे मार्गमां जतां सूर्योदय थयो. ॥ ८१ ॥

धनञ्जयसुता तत्र जाग्रता केलिमन्दिरे । मां मुक्त्वा च गतः कुत्र चिन्तितमिति मे पतिः ॥८२॥

अर्थः—हवे कदली–मंडपमां रहेली धनंजयनी पुत्री पद्मावती जागी, अने विचारवा लागी के मारो पति मने मूकीने क्यां गयो ? ॥ ८२ ॥

अर्पिताहं च भर्त्तारं मिलित्वा मातृपितृभिः । न मुञ्चति वनेऽसो मां यानपात्रे भविष्यति ॥ ८३ ॥

अर्थः—मने मात–पिताए मलीने भर्तारने सोपी छे तो ते मने वनमां मूकीदे नहिं, ते वहाणमां हशे. ॥ ८३ ॥

साऽपि जगाम तत्पोतं गत्वा तत्र विलोकितम् । न यानं न च भर्ता हि धरित्र्यां पतिता ततः ॥

अर्थः—बाद तेणी वहाणपासे जइने जुए छे तो वहाण अने भर्तारने न जोवाथी पोते जमीनपर पडी गइ. ॥ ८४ ॥

चकार रोदनं तस्मिन् पद्मावती वियोगिनी । किं करोमि क्व गच्छामि रमणेन विनाऽधुना ? ॥८५॥

अर्थः—अने वियोगिनी एवी तेणी रुदन करवा लागी के हवे शुं करुं ? भर्तार विना हवे हुं क्यां जउं ? ॥ ८५ ॥

"सुख गयां सवि सासरइ पीहर टलीउं मान । कंतविहूणी गोरडी जिहा जाइ तिहा रान ॥८६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

 

अर्थः—सासरेथी सर्व सुख गयुं, पीयरमां मान गयुं, पति विनानी स्त्री ज्यां जाय त्यां रान ( अर्थात् आधार रहित जंगल जेवुं ) छे ॥ ८६ ॥

हियडा ! झूर म मुष्टिकर झूरत नयणे हाणि । कवण सुणेस्यइ रानमां रोयुं कंठ पराण ॥८७॥

अर्थः—माटे हे हृदय ! हवे रोवुं अने झुरवुं नकामुं छे कारणके रोवाथी नयनने अने कंठने हानिज छे, आ निर्जन वनमां कोण सांभळशे ? ॥ ८७ ॥

दैवें कीधां दूरि दोहिलुं केतुं आणीइ । हीयडा करि संतोस करम लिख्युं फल पाईइ ॥८८॥ यतः—

अर्थः—माटे हे हियडा ! दैवे वियोग कराव्यो एमां कोने ओलंभो दइए ? माटे संतोष राख कर्ममां लख्युं फळ मळे छे. ॥ ८८ ॥ केमके—

उद्यति यदि भानुः पश्चिमायां दिशायां, प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां, न चलति विधिवशानां भाविनी कर्म्मरेखा ॥ ८९ ॥

अर्थः—कदाच सूर्य पश्चिम दिशामां उगे, कदाच मेरु चलायमान थाय, कदाच अग्निमां शीतलता आवे, कदाच पर्वतनी शिलामां पद्म उगे, पण विधिने वश एवी भावी कर्मरेखा चलायमान थती नथी. ॥ ८९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बभूव सावधाना सा प्रसरच्छीतवायुना । तदैव स्वाञ्चले दृष्ट्वा लेखान्वितकपर्दकान् ॥ ९० ॥

अर्थः—बाद शीतल वायुथी तेणी सावधान थइ त्यारे पोताना कपडाने छेडे लेख सहित कोडीओ दीठी. ॥ ९० ॥

वाचयामास तल्लेखं पद्मावती वने स्थिता । प्रत्युवाचेति भर्त्तारं युक्तः कोपोऽत्र ते न भोः! ॥९१॥

अर्थः—ते पत्र पद्मावतीए त्यां वनमांज वांच्यो, अने भर्तारने उद्देशीने बोली के अरे! आवी रीते कोप करवो युक्त नहोतो! ॥ ९१ ॥

उत्तमैर्न कदा कार्यं योषितां वनमोचनम् । विललाप स्थिता तत्र सीतेवाऽरण्यमध्यगा ॥ ९२ ॥

अर्थः—केमके उत्तम माणसोए स्त्रीने वनमां मूकी देवी न जोइए. एम विलाप करती सीतानी पेठे अरण्यमां तेणी रही.

भवतु तव कल्याणं त्वं मां मुक्त्वा गतः परम् । इत्याशीः प्रददौ श्रेष्ठिनन्दनी निजवल्लभम् ॥९३॥

अर्थः—त्यां रही थकी पद्मावती पोताना पतिने संभारीने आशीष आपवा लागी के आप मने मूकीने गया, तो पण आपनुं कल्याण थाओ ? ॥ ९३ ॥

भविष्यतीह त्वत्सङ्गो मया सार्धं यदा धव!। तदाहं तव दास्यामि कांचित् शिक्षां च निश्चितम् ॥

अर्थः—वळी हे स्वामिन! ज्यारे आपनी साथे हुं मळीश त्यारे खरेखर कांइक पण आपने शिक्षा करीश ॥ ९४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ जिनप्रभावाच्च कष्टौघो यास्यति क्षयम् । आदितीर्थकृतो मूर्तिं चकाराऽतो मृगेक्षणा ॥९५॥

अर्थः—हवे जिनप्रभुना प्रभावथी दुःखनो समूह दूर थशे एम विचारी आदिनाथप्रभुनी मूर्ति तेणीए बनावी ॥९५॥

निवेश्य प्रतिमां शैले प्रानर्च सततं वधुः । तदग्रे श्रीनमस्कारान् सा च जपति भावतः ॥ यतः—

अर्थः—ते प्रतिमाने तुरत शिखरपर स्थापन करीने तेणी श्री नवकारमंत्रने भावथी जपवा लागी. ॥९६॥ कह्युं छे के—

संग्राम–सागर–करीन्द्र–भुजङ्ग–सिंह–दुर्व्याधि–वह्नि–रिपु–बन्धनसंभवानि ॥
चोर–ग्रह–भ्रम–निशाचर–शाकिनीनां, नश्यन्ति पञ्चपरमेष्ठिपदैर्भयानि ॥ ९७ ॥

अर्थः—संग्राम, समुद्र, हाथी, सर्प, सिंह, दुस्सह व्याधि, अग्नि, शत्रु बंधन, चोर, ग्रह, भ्रांति, राक्षस अने डाकिनी विगेरेनो भय पंचपरमेष्ठिनां स्मरणथी नाश पामे छे. ॥ ९७ ॥

यो लक्षं जिनबद्धलक्ष्यसुमनाः सुव्यक्तवर्णक्रमं श्रद्धावान् विजितेन्द्रियो भवहरं मंत्रं जपेत् श्रावकः।
पुष्पैः श्वेतसुगन्धिभिश्च विधिना लक्षप्रमाणैर्जिनं यः संपूजयते स विश्वविदितः श्रीतीर्थराजो भवेत् ॥

अर्थः—लाखवार जिनेंद्रने विषे जोडयुं छे लक्ष अर्थात् मन जेणे, तथा साफ हृदयवाळो, श्रद्धावान तेमज इंद्रिओने जीतनारो श्रावक भवने हरवावाळा मंत्रनो जाप करे, तथा सफेद अने सुगंधी एवां लक्षप्रमाण पुष्पोथी विधिपूर्वक जिनेश्वरप्रभुने पूजे ते जगतमां प्रख्यात एवुं तीर्थंकरनामगोत्र बांधे. ॥ ९८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वने रणे शत्रुजलाऽग्निमध्ये, महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥ ९९ ॥

अर्थः—वनमां, रणमां, शत्रुओमां, जलमां, अग्निमां, मोटा समुद्रमां, पर्वतना शिखर उपर सुतेलाने, प्रमाद करनारने, दुस्सह स्थितिमां रहेलाने पूर्वे करेलां पुण्य-कार्यो रक्षण करे छे. ॥ ९९ ॥

अतो बबन्ध सा बाला पर्वतोपरि सद्ध्वजम् । विदृश्यैनं यतः कोऽप्यत्रागच्छति व्रजन्पथि ॥१००॥

अर्थः—हवे ते पद्मावतीए त्यां पर्वतपर एक ध्वजा बांधी, केमके ते जोइने रस्ते चालतो वटेमार्गु कोइ आवे. ॥

क्रमेण कोऽपि तन्मार्गे गच्छंश्च व्यावहारिकः । ध्वजं दृष्ट्वा च तद्द्वीपे तरण्डो रक्षितस्ततः ॥ १ ॥

अर्थः—अनुक्रमे ते मार्गे कोइ व्यवहारी जतो हतो तेणे ध्वजा जोइने त्यां वहाण थोभाव्युं. ॥ १ ॥

उत्तीर्य वणिजां मुख्यो जवात् तत्र नगे गतः । अर्हद्भक्तिपरां बालां ददर्श रूपसुन्दरीम् ॥ २ ॥

अर्थः—तुरतज ते मुख्य वणिक् उतरीने पर्वतपर गयो, त्यां सुंदर रुपवाळी एवी बाळाने अर्हद्भक्तिमां लीन थयेली दीठी.

इति पप्रच्छ तां श्रेष्ठी त्वं तिष्ठसि कथं वने । देवी वा किन्नरी वा त्वं भद्रे कथय मां प्रति ॥ ३ ॥

अर्थः—तेणीने ते वणिके पूछ्युं के हे भद्रे! तुं देवी छो, किन्नरी छो, अथवा कोण छो ? अने आ वनमां केम रहे छे ते तुं मने कहे ? ॥ ३ ॥ 

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पूण ध्यानं च कृत्वा सा, श्रुत्वेति तद्वचोऽवदत्। भ्रातोऽहं श्रेष्ठिनः पत्नी यानभङ्गादिहागता ॥४॥

अर्थः—ते शेठनुं वचन सांभळीने ध्यानमांथी निवृत्त थइने तेणीं बोली के हे भाइ! हुं श्रेष्ठिपत्नी छुं अने वहाणना भांगवाथी अत्रे आवी छुं. ॥ ४ ॥

उवाच तां पुनः श्रेष्ठी भगिनि मे वचः शृणु। आगच्छ त्वं मया सार्धं मोचयिष्ये शुभस्थले ॥५॥

अर्थः—त्यारे शेठे वळी कीधुं के हे बहेन! मारुं वचन सांभळ? मारी साथे तुं चाल, तने योग्य ठेकाणे हुं मूकीश ॥

सा विधायार्हतः पूजां चचाल श्रेष्ठिना सह। चलितं श्रेष्ठिनश्चित्तं वधूपरि व्रजन्पथि ॥१०६॥ यतः—

अर्थः—तेणी पण प्रभु-पूजा करीने शेठनी साथे चाली. मार्गे चालतां तेणी प्रत्ये शेठनुं चित्त चलित थयुं. ॥६॥ केमके—

पुष्पं दृष्ट्वा फलं दृष्ट्वा दृष्ट्वा नारीं सुशोभिताम्। तानि त्रीणि वने दृष्ट्वा कस्य न चलति मनः ॥ ७ ॥

अर्थः—पुष्प, फल अने सुंदर स्त्री ए त्रणेने वगडामां जोवाथी कोनुं मन चलित थतुं नथी? ॥ ७ ॥

भगिनीं कथयित्वेमां वचनाच्चलितः शठः। ज्ञात्वेति शासनदेव्या तत्पोतः खण्डशः कृतः ॥ ८ ॥

अर्थः—ते शठ अर्थात् लुच्चा एवा शेठे भगिनि कहीने मन चलित कर्युं तेथी शासनदेवीए तेना वहाणना कटका करी नाख्या. ॥ ८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सा वधूः फलकं लब्ध्वा प्रोत्तरन्ती पयोनिधिम् । उल्लालिता गजेन्द्रेण शुण्डया सुरवर्त्मनि ॥ ९ ॥

अर्थः—ते पद्मावतीने पाटीयुं हाथ आववाथी समुद्र तरती हती, तेवामां एक हाथीए आवीने तेणीने सुंढ वडे आकाशमां उडाडी. ॥ ९ ॥

विद्याधरविमाने सा पतितातीव सुन्दरी । उवाच कार्मुकं वाक्यं तस्या विद्याधराधिपः ॥ १० ॥

अर्थः—एटले तेणी विद्याधरना विमानमां पडी, तेणीने सुंदर स्वरूपवाळी जोइने विद्याधराधिपति कामोत्तेजक वाक्यो कहेवा लाग्यो. ॥ १० ॥

विद्याधरं च सा बाला वचसा प्रत्यबोधयत् । स शीलादिगुणैस्तुष्टस्तिस्रो विद्या ददौ वराः ॥ यतः—

अर्थः—पण ते विद्याधरने तेणीए वचनोवडे प्रतिबोधवाथी शील विगेरे गुणोथी खुशी थइने विद्याधरे उत्तम त्रण विद्याओ तेणीने आपी. ॥ ११ ॥ केमके—

सीलं उत्तमं वित्तं सीलं आरोग्गकारणं परमं । सीलं भोगनिहाणं सीलं ठाणं गुणगणाणं ॥ १२ ॥

अर्थः—शील छे ते उत्तम धन छे, शील छे ते आरोग्यना कारणभूत छे, शील छे ते संपत्ति देवावाळुं छे, अर्थात् शील गुणना समूहना स्थानरूप छे. ॥ १२ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अदृष्टकरणीं विद्यां परविद्याविनाशनीम् । अन्यरूपकरीं चैव सापि जग्राह तत्क्षणे ॥ १३ ॥

अर्थः—ते विद्याधर पासेथी तेणीए अदृष्टीकरणी, बीजाओनी विद्यानो विनाश करवावाळी अने अन्यरुपकरी ए त्रणे विद्याओ तुरतज ग्रहण करी. ॥ १३ ॥

अहं मुञ्चामि कुत्र त्वां बाले ! कथय मत्पुरः । तयोक्तं सुसुमाराख्यपुरे मुञ्च महाशय ! ॥ १४ ॥

अर्थः—हे बाळा ! हुं तने क्यां मूकुं ? ते मने कहे ? एम विद्याधरे पूछवाथी तेणीए कीधुं के हे महाशय ! मने सुसुमारपुर नामे नगरमां मूक ? ॥ १४ ॥

स बालां तत्पुरोद्याने मुक्त्वा स्वसदने गतः । साऽन्यरूपपरावर्त्या विद्यया पुरुषोऽभवत् ॥ १५ ॥

अर्थः—बाद तेणीने ते नगरना उद्यानमां मूकीने विद्याधर पोताने स्थानके गयो, पछी पद्मावती रूपपरावर्तिनी विद्याथी पुरुषरूपे थइ. ॥ १५ ॥

सहस्राङ्केति नाम्नाऽसौ भूत्वाजगाम तत्पुरे। पुष्पलावीगृहे तस्थौ लीलया क्रीडयन् भृशम् ॥ १६ ॥

अर्थः—सहस्रांक नाम धरीने तेणी गाममां गइ अने मालीने घरे उतरीने अत्यंत क्रीडा करवा लागी. ॥ १६ ॥

नगरस्य जनाः सर्वे आयान्ति तस्य संनिधौ । सोऽपि समस्तशास्त्राणि सर्वेषां वदति स्फुटम् ॥१७॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते सहस्रांक पासे नगरना घणा माणसो आववा लाग्या, अने ते पण तेओनी पासे सर्व शास्त्रोनी हकीकत कहेतो हवो. ॥ १७ ॥

मालिनीसदने तिष्ठन्मे जाता बहवो दिनाः । विना द्रव्येण मद्भक्तिरनया क्रियते भृशम् ॥ १८ ॥

अर्थः—आ मालणने घरे हुं घणा दिवसो थयां रहुं छुं, छतां द्रव्य विना तेणी मारी घणी भक्ति करे छे, ॥ १८ ॥

कयाचित् कलया कृत्वा द्रव्यं ददामि तत्करे । इति मत्वा करे तस्या आर्पयच्च कपर्दकान् ॥१९॥

अर्थः—तो काइंक कळा करी तेणीने द्रव्य आपुं, एम विचारीने मालणने तेणे कोडीओ आपी. ॥ १९ ॥

उवाचेति भृशं श्रेष्ठिनन्दनो मारविग्रहः । मत् कपर्दान् गृहीत्वा त्वं बर्हाण्यानय मालिनि ! ॥२०॥

अर्थः—अने कामदेवजेवा देहवाळा श्रेष्ठिपुत्र सहस्रांके कीधुं के हे मालिनि ! आ कोडीओ लेइने तुं मोरनां पीछां लाव ?

सद्बर्हाणि समानीय कुमाराय च सा ददौ । कृतस्तेन नरब्रह्मनामाङ्कितः सुव्यञ्जनः ॥ २१ ॥

अर्थ—मालणे ते पीछां लावीने सहस्रांकने आप्यां, तेणे "नरब्रह्म" एवा अक्षरो अंदर गोठवीने एक पंखो बनाव्यो. ॥

इत्युक्त्वा स ददौ तस्या हस्ते व्यञ्जनकं मुदा । पंचशतैश्च दीनारैः विक्रेयः षोडशाधिकैः ॥२२॥

अर्थः—अने मालणने हर्षपूर्वक ते पंखो आपीने कीधुं के तारे (५१६) सोनामहोरोथी आ पंखो वेंचवो. ॥ २२ ॥



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

विक्रेयार्थं गृहीत्वा सा गता व्यञ्जनकं मुदा । वदन्ती मालिनी मूल्यं चतुष्पथे जनाकुले ॥ २३ ॥

अर्थः—मालण पण ते पंखो वेचवा माटे बजारमां गइ, अने माणसोथी भरपूर बजारमां बेसीने तेणी किंमत कहेवा लागी. ॥ २३ ॥

जनाः पुरस्य तत्पार्श्वे दर्शनार्थं समागताः । एकः करे गृहीत्वा तं पश्यतिस्म निरर्थकम् ॥ २४ ॥

अर्थः—नगरना लोको ते पंखो जोवा माटे त्यां एकठा थया, कोइ हाथमां लेइ फोकट जोवा लाग्या. ॥ २४ ॥

पप्रच्छैकस्तस्य मूल्यं वायुं क्षिपति कश्चन । वदत्येको न गृह्णामि हास्यमेके प्रकुर्वति ॥ २५ ॥

अर्थः—कोइ तेनुं मूल्य पूछवा लाग्या, कोइ तेनाथी पवन नाखवा लाग्या, कोइ हास्यपूर्वक कहेवा लाग्या के आ तो आपणे न लइ शकीए? ॥ २५ ॥

इयं जाता हि ग्रथिला वदन्त्येते मिथो जनाः। यदास्ति द्रव्यमेतच्च प्राप्यन्ते व्यञ्जनोत्कराः ॥२६॥

अर्थः—कोइ कहे आ गांडी थइ गइ लागे छे, जो एटलुं द्रव्य होय तो पंखाना ढगला आवी पडे! ॥ २६ ॥

एकस्य हृदये जातमाश्चर्यं बहुमूल्यतः । कथितस्तेन वृत्तान्तः नरब्रह्मनृपाय च ॥ २७ ॥

अर्थः—बहु मूल्य होवाथी एक माणसने आश्चर्य थयुं तेथी तेणे ते हकीकत नरब्रह्म राजाने कही. ॥ २७ ॥



P.P. Ac. Gunratnasuri M.S.		Jun Gun Aaradhak Trust

स तामाकारयामास कौतुकाद् नृपतिर्जवात् । साऽपि गत्वा स्थिता पार्श्वे प्रणम्य नृपतिं च तम् ॥

अर्थः—कौतुकथी राजाए तुरतज तेणीने बोलावी त्यारे तेणी जइने राजाने प्रणाम करीने उभी. ॥ २८ ॥

॥२८॥ तं स्वनामाङ्कितं दृष्ट्वा व्यञ्जनं हर्षितो नृपः । आपृच्छ्थ मालिनीं मूल्यं द्विगुणं दत्तवान् नृपः ॥

अर्थः—पोतानुं नाम गोठवेलो पंखो जोइने राजाए हर्षित थइने मूल्य पूछ्युं, तेथी बमणुं राजाए तेणीने आप्युं. ॥२९॥

पुनः पप्रच्छ तां राजा निर्मितः केन व्यञ्जनः । मालिन्यूचे महोनाथ! वैदेशिकोऽस्ति मद्गृहे ॥३०॥

अर्थः—वळी फरीने राजाए पूछ्युं के आ कोणे गोठव्युं? त्यारे मालणे कीधुं के हे पृथ्वीपति! मारे घेर एक वैदेशिक आवेल छे, ॥ ३० ॥

रूपलावण्यसंपन्नो विद्यया कलितो युवा । तेनायं निर्मितो रम्यस्तव नामसमन्वितः ॥ युग्मम् ॥

अर्थः—ते रूप, लावण्य अने विद्याथी युक्त एवो युवान छे, तेणे आपना नाम सहितनो आ सुंदर पंखो बनाव्यो छे. ॥

श्रुत्वेत्याकारयामास तं कुमारं नराधिपः । पुष्पलावीगृहात्सोऽप्यागत्याऽननाम तं शिरः ॥ ३२ ॥

अर्थः—ते सांभळीने राजाए मालणने घरेथी ते कुमारने बोलाव्यो, कुमारे पण आवीने राजाने मस्तक नमावीने प्रणाम कर्या. ॥ ३२ ॥ ॥२८॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

विद्यावन्तं विदित्वा तं नरब्रह्मनराधिपः । मुमोचात्माङ्गजान् सद्यस्तत्पार्श्वे पठनाय च ॥ ३३ ॥

अर्थः— बाद ते नरब्रह्मराजाए तेने विद्वान जाणीने तुरतज पोताना पुत्रोने तेना पासे भणवा मोकल्या, ॥ ३३ ॥

शब्दनीतिलसत्काव्य–शास्त्रछन्दांसि भूरिशः । एतानि सर्वशास्त्राणि पाठयैतान् ममाज्ञया ॥ यतः–

अर्थः—अने आज्ञा करी के आ मारा पुत्रोने शब्द, नीति, उत्तम काव्यो, छंदशास्त्र, विगेरे सर्व शास्त्रोनो अभ्यास कराव ? ॥ ३४ ॥ कह्युं छे के—

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता, विद्या राजसु पूज्यते नहि धनं विद्याविहीनः पशुः ॥

अर्थः—विद्या पुरुषनुं अधिक रुप छे, विद्या गुप्त धन छे, विद्या भोगने करवावाळी तथा यश अने सुख करवावाळी तथा गुरुनी पण गुरू छे, वळी विद्या छे ते परदेशने विषे बंधुसमान अने इष्ट देवता जेवी छे, राजसभामां पण विद्या पूजाय छे धन पूजातुं नथी अर्थात् विद्या रहित माणस पशु समान छे. ॥ ३५ ॥

उवाच सहस्राङ्कोऽसो नरब्रह्ममिति स्फुटम् । एतेषां पाठनकृते मन्दिरं मे समर्पय ॥ ३६ ॥

अर्थ—त्यारे सहस्रांके ते नरब्रह्म राजाने कीधुं के कुमारोने भणाववा माटे मने एक महेल आपो ? ॥ ३६ ॥

राज्ञा तस्मै गृहं दत्तं तस्थिवान् सोऽपि निर्भयः । कुमारान् पाठयामास तान् सर्वान् हि निरन्तरम् ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—राजाए तेमने महेल आप्यो, त्यां निर्भयपणे रह्यो थको सहस्रांक राज—कुमारोने हमेशां भणावतो हतो. ||३७||

छन्दोऽलङ्कारसङ्गीतगूढार्थन्यायनीतयः । एतानि सर्वशास्त्राणि पेठुस्ते च विशेषतः ॥ ३८ ॥

अर्थः—छंद, अलंकार, संगीत, गूढार्थ छे जेमां एवुं न्यायशास्त्र, तथा नीतिशास्त्र ए सर्व शास्त्रो तेओ विशेषप्रकारे भणता हवा. ॥ ३८ ॥

कलासु कुशलाः सर्वे जाताः स्तोकदिनैरपि । राज्ञोऽग्रे सहसाङ्केन मुक्तास्तेऽपि च बालकाः ॥ ३९ ॥

अर्थः—थोडा दिवसोमां पण तेओ सर्वे कळामां पारंगत थया त्यारे सहस्रांके ते कुमारोने राजा पासे मोकल्या. ॥३९॥

तान् कुमारान् नृपेणोक्तं परीक्षार्थमिति ध्रुवम् । दर्शयन्तु विनोदं भोः ! पुत्राः ! शास्त्रस्य मत्पुरः ॥ ४० ॥ एक एकं प्रत्युवाच—

अर्थः—ते कुमारोनी परीक्षा माटे राजाए कीधुं के हे पुत्रो ! शास्त्रनो विनोद तमे खरेखर मारापासे प्रगट करो ? ॥ ४० ॥ राजपुत्रो परस्पर कहे छे के—

किं जीविअस्स चिह्नं ? का भज्जा होइ मयणरायस्स ? किं पुप्फाणं पहाणं ? परिणीआ किं कुणइ वाला ? ॥ ४१ ॥ अपरेणोत्तरं दत्तमिति—'सासरइजाइ' । पुनः द्वितीयेनोक्तम्—



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—जीवितनुं चिन्ह शुं? कामदेवनी स्त्री कोण? पुष्पमां प्रधान पुष्प कयुं? अने परणेली बाळा शुं करे? ॥४१॥ बीजाए उत्तर आप्यो के "सासुरइजाइ" वळी बीजाए पूछयुं के—

**शरीरं विगताकारमनुस्वारविवर्जितम् । यदिदं जायते रूपं तत्ते भवतु सर्वदा ॥४२॥ अपरेणोक्तम्—श्रीरिति । पुनरेकेनोक्तम्—**

अर्थः—विगताकार शरीरवाळुं, अनुस्वारथी रहित, एवुं जे रूप थाय ते हमेशां तमोने थाओ? ॥४२॥ बीजाए जवाब आप्यो के "श्री" लक्ष्मी. वळी बीजाए पूछयुं के—

**आद्येन हीनं जलधावदृश्यं, मध्येन हीनं भुवि वर्णनीयम् । अन्त्येन हीनं धिनुते शरीरं, यस्याभिधानं स जिनः श्रिये वः ॥ ४३ ॥ अन्येनोत्तरं दत्तम्—शीतल इति. पुनः कश्चिदुवाच—**

अर्थः—जे नामनो पहेलो अक्षर हीन करीए तो ते समुद्रथी अदृश्य रहे छे, मध्य अक्षर हीन करीए तो पृथ्वीमां प्रशंसनीय छे, अंत्य अक्षर हीन करीए तो ते शरीरने कंपाववावाळुं थाय छे, ते जिनेश्वर आपणा कल्याण माटे थाओ? ॥ ४३ ॥ बीजाए उत्तर आप्यो के "शीतल" शीतलनाथ प्रभु. वळी कोइ बोल्यो के—

**जटिलोऽपि न च ब्रह्मा त्रिनेत्रो नैव शंकरः । अम्बुधरो नैव मेघो वनवासी नैव तापसः ॥४४॥ चतुर्थेनोत्तरं दत्तम्—नालिकेरमिति ।**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—जटावाळो छे पण ब्रह्मा नथी, त्रण चक्षुओवाळो छतां शंकर नहि, जलने धारण करवावाळो छतां मेघ नहिं, अने वनवासी छतां तापस नथी. (त्यारे ते कोण ?) ॥ ४४ ॥ चोथाए उत्तर आप्यो के "नालिकेर" नाळीएर.

इति शास्त्रविनोदं स दृष्ट्वा निजाङ्गजन्मनाम् । हर्षितस्तमुवाचैवं सहस्राङ्कं धराधवः ॥ ४५ ॥

अर्थः—ए प्रमाणे पोताना पुत्रोने शास्त्र-विनोद करता जोइने हर्षित थयेला राजाए सहस्रांकने कीधुं के— ॥४५॥

तुष्टोऽहं त्वयि सत्प्राज्ञ ! याचस्व वरमीप्सितम् । ययाचे शौल्किकत्वं स ददौ राजापि तत्क्षणम् ॥

अर्थः—हे सत्पुरूष ! हुं ताराप्रत्ये तुष्टमान थयो छुं तो इच्छित माग ? त्यारे सहस्रांके दाण लेवानुं अधिकारीपणुं माग्युं. त्यारे राजाए पण तुरत तेने ते काम सोंप्युं. ॥ ४६ ॥

शौल्किकत्वं गृहीत्वा स स्वानुचरान् प्रजल्पति । अर्द्धदाणं मया मुक्तं तच्चौर्यं त्याज्यमङ्गिभिः ॥४७॥

अर्थः—तेणे जगातनुं काम ग्रहण करीने पोताना नोकरोने जणाव्युं के हुं अरधो जगात माफ करुं छुं, माटे कोइ पण माणसे दाण चोरी करवी नहिं. ॥ ४७ ॥

इत्यादिघोषणां कृत्वा कुमारस्तत्र तस्थिवान् । सुखेन स्वाधिकारं च पालयामास तत्पुरे ॥ ४८ ॥

अर्थः—एम ढंढेरो पीटावीने ते कुमार त्यां रह्यो थको सुखे करी पोतानो अधिकार पाळतो हतो. ॥ ४८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ तस्मिन्पुरे चौरः समागत्य निरन्तरम्। चौर्य्यं करोति निःशङ्को दुर्जयो दिव्यविद्यया ॥ ४९ ॥

अर्थः—हवे ते नगरमां दुर्जय एवो कोइ चोर हमेशां आवीने दिव्य विद्याथी चोरी करतो हतो. ॥ ४९ ॥

एकदेति महीपालो विज्ञप्तो पुरवासिभिः। अस्माभिश्चौरभीत्या च पुरे स्थातुं न शक्यते ॥ ५० ॥

अर्थः—तेथी एक दिवसे नगरना लोकोए राजाने विनंति करी के अमे चोरनी बीकथी आ नगरमां रहेवाने असमर्थ छीए. ॥ ५० ॥

नृपः श्रुत्वा तलारक्षमाहूयेत्यवदत् ततः। चौरं कर्षय त्वं सद्यो यथाऽत्र स्यात् सुखं नृणाम् ॥ ५१ ॥

अर्थः—एम सांभळीने राजाए कोटवाळने बोलाव्यो अने कीधुं के तुं चोरने तुरत पकड? के जेथी आ लोकोने सुख थाय.

इत्युवाच तलारक्षो नरब्रह्ममहानृपम्। विलोकितो मया चौरः परं क्वापि न लभ्यते ॥ ५२ ॥

अर्थः—कोटवाळे नरब्रह्मराजाने कह्युं के में चोरने घणो जोयो पण क्यांय मळतो नथी. ॥ ५२ ॥

ततो मन्त्री लसद्बुद्धिर्नरब्रह्ममुवाच तम्। अद्याऽहं तस्करं कर्षे उदित्वा बीडकं धृतम् ॥ ५३ ॥

अर्थः—त्यारे लसतबुद्धि नामना मंत्रीए राजाने कीधुं के आजेज हुं चोरने पकडुं एम कही बीडुं लीधुं. ॥ ५३ ॥

इति श्रुत्वापि स चौरः प्रधानसदने गतः। दत्वाऽवस्वापिनीं निद्रां सर्वेषां गृहवासिनाम् ॥ ५४ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ए हकीकत सांभळीने चोरे ते प्रधानने घेर जइने घरना सर्व माणसोने अवस्वापिनी निद्रा आपी. ॥ ५४ ॥

**कृत्वा च पश्चिमे द्वारं प्रविष्टस्तत्र तस्करः । गृहनेतेव सर्वत्र ददर्श निर्भयो बली ॥ ५५ ॥**

अर्थः—अने पछवाडेना बारणेथी प्रवेश करीने बळवान अने निर्भय एवो ते चोर घरना धणीनी पेठे बधुं जोवा लाग्यो.

**मुक्ताफलानि रत्नानि वस्त्राणि भूषणानि च । अन्यान्यपि च वस्तूनि मुषित्वा तस्करो गतः ॥५६॥**

अर्थः—बाद रत्नोनो समूह, मुक्ताफल, वस्त्राभूषण विगेरे घणी वस्तुओ चोरीने ते चोर चाल्यो गयो. ॥ ५६ ॥

**प्रभातसमये जाते प्रधानो जागृतस्ततः । तदैव स्वगृहे खात्रं दृष्ट्वा मनसि विस्मितः ॥ ५७ ॥**

अर्थः—सवार थतां प्रधान जागीने जुए छे तो पोतानाज घरमां चोरी थयेली जोइने मनमां विस्मित थयो. ॥ ५७ ॥

**स प्रधानो नृपासन्ने गत्वाऽवदत् पुनः पुनः । न मुक्तं मद्गृहे किञ्चित् चौरेण स्फारबुद्धिना ॥५८॥**

अर्थः—ते प्रधान राजा पासे आवीने वारंवार कहेवा लाग्यो के चतुर बुद्धिवाळा एवा चोरे मारा घरमां कंइ रहेवा दीधुं नथी. ॥ ५८ ॥

**ततोऽवदज्जराजीर्णा नृपं नगरनायिका । वशीकार्यो मया चौरः क्षणेन कपटाद् भृशम् ॥ ५९ ॥**

अर्थः—त्यारे घडपणथी वृद्ध थयेली नगरनी नायिकाए राजाने कह्युं के हुं एक क्षणमां कपटथी चोरने वश करी लेइश. ॥ ५९ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रूपमद्भुतमा ! धृत्वा श्रुत्वा चोरः स बीडकम् । क्रीडां कुर्वन् सुयामिन्यामागतो नायिकागृहे ॥६०॥

अर्थः—ए वात सांभळीने अद्भुत रुप करीने चोर क्रीडा करतो रात्रिए नायिकाने घरे आव्यो. ॥ ६० ॥

कुब्जरूपधरां दासीं दृष्ट्वा चौरेण तत्र च । मुष्टिघातेन सा दासी सरला विहिता तदा ॥ ६१ ॥

अर्थः—त्यां चोरे कुबडी एवी एक दासीने जोइने मुष्टि—प्रहारथी ते कुबडीने सरल करी दीधी. ॥ ६१ ॥

साऽपि स्वस्वामिनीपार्श्वे गत्वा नत्वा च संस्थिता । द्वारस्थितेन केनापि सरला विहिता मुदा ॥

अर्थः—ते दासी पण पोतानी बाइ पासे जइने प्रणामपूर्वक कहेवा लागी के बहार उभेला कोइके मने सरल करी दीधी.

नायिकोवाच तं श्रुत्वा दासीमिति पुनः पुनः । त्वमाकारय तं भद्रे ! शीघ्रं सोऽपि समागतः ॥६३॥

अर्थः—ते सांभळीने नायिका दासीने वारंवार कहेवा लागी के हे भद्रे ! तेने तुं तुरत बोलाव ? तेथी ते पण आव्यो.

नायिकोवाच भो विद्वन् ! मां कुरु नवयौवनाम् । अर्पिता गुटिका तस्यै शिक्षयित्वेति तेन वै ॥६४॥

अर्थः—त्यारे नायिकाए तेने कीधुं के हे विद्वान ! मने नव—यौवना बनाव? त्यारे ते चोरे तेने जडीबुटी आपीने शीखव्युं के, ॥ ६४ ॥

शून्यसद्मनि निर्वस्त्रं स्थातव्यं त्वयकाऽधुना । त्वां यदा कथयिष्येऽहं गन्धनीयेयमद्भुता ॥ ६५ ॥ ॥३५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—हमणां तारे एक शून्य ओरडामां जइने निर्वस्त्र थइने रहेवुं, अने ज्यारे हुं कहुं त्यारे आ अद्भुत प्रभाववाळी जडोबुटी तारे सुंघवी. ॥ ६५ ॥

**स नायिकां गृहे क्षिप्त्वा कपाटं दत्तवान् ततः । पश्चात्सर्वाणि वस्तूनि मुषित्वा तस्करोऽवदत् ॥**

अर्थः—ए प्रमाणे नायिकाने ओरडामां राखी माथे आगळीओ देइने सर्व वस्तुओ चोरी लेइने चोर बोल्यो के, ॥६६॥

**गन्धस्व गुटिकां वृद्धे ! इत्युक्त्वा तस्करो ययौ । सापि वारत्रयं मूलीगन्धिताऽभूच्च रासभी ॥६७॥**

अर्थः—हे वृद्धा ! ते गुटिकाने हवे सुंघ ? एम कहीने ते चोर चालतो थयो. तेणीए त्रणवार ते गुटिका सुंघवाथी गवेडीरुपे थइ गइ. ॥ ६७ ॥

**प्रातःकालो यदा जातस्तदा दासी समागता । वृद्धां च रासभीं दृष्ट्वा गत्वा राज्ञे न्यवेदयत् ॥६८॥**

अर्थः—सवार थतां दासी आवीने जुए छे तो नायिकाने गवेडीरुपे जोइने तेणीए राजा पासे जइने निवेदन कर्युं.

**तत् श्रुत्वा सुभटाः सर्वे तस्मिन्पुरेऽपि हारिताः । तद् बीडकं हि केनापि चौरभीत्या च नाद्दतम् ॥६९॥**

अर्थः—ते सांभळीने राजाए आखा नगरमां लश्कर गोठवी दीधुं, पण चोरनी बीकथी कोइए बीडुं लीधुं नहिं. ॥६९॥

**चिन्तितमिति चौरेण कस्मिन् सुवासरे हृदि । अथानयामि भूपस्य पुत्रीमतीव सुन्दराम् ॥ ७० ॥**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—वळी कोइ सारे दिवसे चोरे विचार कर्यो के आ राजानी अति खुबसुरत एवी तेनी पुत्रीने लइ आवुं ॥७०॥

मध्यरात्रौ समागत्य गृहीता नृपनन्दनी। गत्वा स्वसदने मुक्ता पुत्रीमतीव सुन्दराम् ॥ ७१ ॥

अर्थः—मध्य रात्रिए चोरे निर्भयपणे आवीने ते सुंदरतर राज-पुत्रीने लेइने पोताने घरे मूकी. ॥ ७१ ॥

प्रातस्तस्या गृहे चेटी समायाता शुभानना। नो दृष्ट्वा तत्र तां बाला—मित्यवोचन्नृपान्तिके ॥७२॥

अर्थः—सवारे ते राज-पुत्रीना महेलमां सुंदर चहेरावाळी दासी आवीने जुए छे तो तेणीने न जोवाथी राजापासे आवीने ते दासीए निवेदन कर्युं. ॥ ७२ ॥

स्वपुत्रीहरणं ज्ञात्वा पटहोद्घोषणं कृतम्। यो ह्यानयति मत्पुत्रीं लभते तां सलक्ष्मीकाम् ॥७३॥

अर्थः—पोतानी पुत्री पण गुम थयाना खबर सांभळीने राजाए पटह वजडाव्यो के जे कोइ मारी पुत्रीने लावशे ते, ते कन्या लक्ष्मीसहित मेळवशे. ॥ ७३ ॥

सहसाङ्केन तं श्रुत्वा गृहीतः पटहस्ततः। नृपते! स्मर जिनाधीश—मागच्छति यथा सुता ॥ ७४ ॥

अर्थः—ते सांभळीने सहस्रांके बीडुं लीधुं अने कीधुं के हे राजन्! जिनेश्वरप्रभुनुं स्मरण कर के जेथी तारी पुत्री आवे. ॥ ७४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुनरूचे नृपस्याग्रे सहसाङ्कः स्वबुद्धिना। चौरस्य बन्धनं कृत्वाऽनेष्यामि हि तवात्मजाम् ॥ यतः–

अर्थः—वळी ते सहस्रांके बुद्धिपूर्वक राजाने कीधुं के ते चोरने बांधीने तारी पुत्री सहित खरेखर लावुं छुं. ॥ केमके–

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम्। वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥ ७६ ॥

अर्थः—जेनी पासे बुद्धि–बल छे तेज खरुं बल छे. बुद्धि रहितने बल क्यांथी होय ? कारण के वनमां मदोन्मत्त एवा सिंहने पण शीयाळे ( कुवामां ) पाडयो. ॥ ७६ ॥

उद्यमः साहसं धैर्यं बलं बुद्धिपराक्रमम्। षडेते यस्य विद्यन्ते, तस्य देवोऽपि शङ्कते ॥ ७७ ॥

अर्थः—वळी उद्यम, साहस, धैर्य, बल, बुद्धि अने पराक्रम, ए छ जेना पासे छे तेनाथी देवताओ पण शंकित रहे छे. ॥

उदित्वेति कुमारस्तं स्वसदने समागतः। प्रत्युद्घाट्य स्वभण्डारान् प्रच्छन्नः संस्थितो निशि ॥७८॥

अर्थः—ए प्रमाणे राजाने कहीने ते सहस्रांके पोताने स्थानके आवीने पोताना भंडारो उघाडा राख्या अने रात्रिए पोते गुप्तपणे उभो रह्यो. ॥ ७८ ॥

परविद्याविनाशनीं स्मरन् चित्ते स हर्षितः। स्वकीयमदृश्यरूपं कृत्वा तत्र च तस्थिवान् ॥ ७९ ॥

अर्थः—अन्यनी विद्यानो नाश करवावाळी विद्यानुं स्मरण करीने तथा पोतानुं अदृश्य रुप करीने ते सहस्रांक उभो. ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्मिन्नवसरे चौर आगत्य तस्य सद्मनि। सर्वेषामवस्वापिनी-निद्रां ददौ स निर्भयः ॥ ८० ॥

अर्थः—ते समये निर्भय एवा ते चोरे तेना मकानमां आवीने बधाने अवस्वापिनी निद्रा आपी. ॥ ८० ॥

कुमारविद्यया जाता-ऽवस्वापिनी च निष्फला। दृष्टं सर्वं कुमारेण न च चौरेण स पुमान् ॥८१॥

अर्थः—पण कुमारनी विद्याथी अवस्वापिनी निद्रा निष्फल थवाथी सहस्रांक बधुं जोतो हतो पण चोरे तेने दीठो नहिं. ॥

ततः सर्वाणि वस्तूनि गृहीत्वा तस्करो व्रजन्। दृष्टस्तेन कुमारेण सोऽपि चचाल पृष्ठतः ॥ ८२ ॥

अर्थः—त्यारे सर्व वस्तुओ लेइने चोर चालवा लाग्यो ते कुमारे दीठुं त्यारे ते पण तेनी पाछळ चालवा लाग्यो. ॥

गुफामुद्घाट्य चौरोऽसौ धनं मुक्त्वा च तत्क्षणम्। इत्युवाच कुमारीं तां भुंक्ष्व भोगान्मया सह ॥

अर्थः—चोरे गुफा उघाडीने अंदर धन मूकीने तुरतज राज-पुत्रीने कहेवा लाग्यो के मारी साथे भोग भोगव ? ॥८३॥

चौरमूचे कुमारी सा श्रुत्वेति वचनं कटु। बलात्कारेण सत्प्रीतिर्नो भवति कदाचन ॥८४॥ यतः—

अर्थः—ते कडुवाणी सांभळीने तेणीए चोरने कीधुं के कोइ दिवस बलात्कारथी सत्प्रीति थती नथी. ॥८४॥ केमके—

कविता वनिता गीतिः, स्वयमेवागता वरम्। बलादाकर्षमाणा हि सरसा विरसा भवेत् ॥ ८५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—कविता, ललना अने गीति पोतानी मेळे आवेलां सारां, पण बळजबरीथी मेळववामां आवे तो सरस होवा छतां नीरस थइ जाय छे. ॥ ८५ ॥

श्रुत्वा तद्वचनं चोरो भीमखड्गेन सत्वरम्। केशपाशं करे कृत्वा तां प्रहर्तुं समुत्थितः ॥ ८६ ॥

अर्थः—तेणीनुं ते वचन सांभळीने तुरतज चोरे तेणीनो चोटलो झालीने भयंकर खड्ग लेइने मारवा उठ्यो. ॥८६॥

तद् दृष्ट्वा सहस्राङ्कश्च खड्गं धृत्वा करेऽवदत्। तस्कर! मां समागच्छ यदि त्वं बलवानसि ॥८७॥

अर्थः—ते जोइने सहस्रांक पण तलवार हाथमां लेइने बोल्यो के हे चोर! तुं जो बलवान छे तो मारा सामे आव? ॥

श्रुत्वा विमुच्य तां चौरो, गतः कुमारसन्निधो। कुमारचौरयोर्युद्ध—मभूत्तत्र भयङ्करम् ॥ ८८ ॥

अर्थः—ते सांभळीने चोर तेणीने मूकीने सहस्रांकसामे गयो, अने त्यां तेओ बन्ने वच्चे भयंकर युद्ध थयुं. ॥ ८८ ॥

दृढं बद्धः कुमारेण तस्करो बलवानपि। करगृहीतनिस्त्रिंशः सत्त्वात् किं लभते न हि? ॥८९॥ यतः—

अर्थः—चोर बळवान हतो तेने पण सहस्रांके दृढ बांध्यो, कारण के सत्त्ववान अने हस्तमां राखेल छे तलवार जेणे ए शुं नथी मेळवी शकतो? ॥ ८९ ॥ कह्युं छे के—

विजेतव्या लङ्का चरणतरणीयो जलनिधिर्विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तथाप्येको रामः सकलमवधीद्राक्षसकुलं, क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥ ९० ॥

अर्थः—लंकाने जीतवी, चरणथी समुद्र तरवो अने रावण जेवा शत्रुने जीतवा माटे सहायक फक्त वांदरा हता, छतां एक एवा रामे आखा रावणना कुळने हणी नाख्युं, माटे महान् माणसोनी क्रिया–सिद्धि सत्त्वमां रहेली छे, उपकरण (साधन) मां नहिं. ॥ ९० ॥

घटो जन्मस्थानं मृगपरिजनो भूर्जवसनो, वने वासः कन्दाशनमपि च दुःस्थं वपुरिदम् ।
तथाऽप्येकोऽगस्त्यः सकलमपिबद् वारिधिजलं, क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥९१॥

अर्थः—घट छे जन्मस्थान जेनुं. मृग छे सहचारिओ जेना, भोज–पत्र छे वस्त्रो जेनां, वनमां छे वास जेनो, फळाहार छे जेनो तथा अत्यंत दुर्बल छे शरीर जेनुं, एवो एक अगस्ति सघळुं समुद्र–जल पी गयो, माटे महान माणसोनी सत्त्वमांज क्रियासिद्धि रहेली छे, उपकरणमां नहिं. ॥ ९१ ॥

सुभटश्रेणिकोटीरः कुमारो नृपसन्निधौ । प्रत्यूषसमये गत्वा सद्यस्तावार्पयद् भृषम् ॥ ९२ ॥

अर्थः—बाद सहस्रांक घणा सुभटोथी परिवरेलो सवारे तुरतज राजापासे जइने (सर्व वस्तु) अर्पण करतो हवो. ॥

यत्तस्करेण तद्ग्रामे गृहीतं वस्तु विश्रुतम् । तत्सर्वं जनतावृन्दैर्गृहीतं श्रीनृपाज्ञया ॥ ९३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते गाममांथी चोरे चोरेली अनेक वस्तुओ राजानी आज्ञाथी जन-समूहे लेइ लीधी. ॥ ९३ ॥

जनाः सर्वेऽपि सन्तुष्टाः कुमारायाशिषं ददुः । दृष्ट्वा तस्य कुमारस्य कार्यमेतद्वरीयसम् ॥ ९४ ॥

अर्थः—ते सहस्रांकनुं आवु मोटुं कार्य जोइने सर्व लोको संतुष्ट थया थका तेने आशीष आपवा लाग्या. ॥ ९४ ॥

खर्यऽवस्वापिनी विद्या तालकोद्घाटनी तथा । तथा रूपकरी विद्या विदुषां वल्लभा सदा ॥ ९५ ॥

अर्थः—उत्तम एवी आकाशगामिनी विद्या, अवस्वापिनी विद्या, तालकोद्घाटिनी विद्या तथा विद्वानोने हमेशां प्रिय एवी रूपपरावर्तिनी विद्या ॥ ९५ ॥

चतस्रस्तस्करादेता विद्या जग्राह तत्क्षणम् । कुमारसहसाङ्को हि सत्त्ववान् सुजनप्रियः ॥ ९६ ॥

अर्थः—ए चारे विद्या ते चोर पासेथी तुरतज सज्जनप्रिय अने बळवान एवा सहस्रांके खरेखर ग्रहण करी. ॥ ९६ ॥

कुमारानुग्रहाद्राज्ञा कर्षितो देशतो बहिः। अवध्य इति निश्चित्य तस्करो निजचेतसि ॥ ९७ ॥

अर्थः—बाद राजाए ते चोरने कुमारना आग्रहथी देशपार कर्यो, अने चोर पण पोताने अवध्य मानीने निश्चित थयो. ॥

नगर्या जयकारो हि तस्मिन् जातो विशेषतः । तस्करकर्षणादेव कुमारोऽपि स हर्षितः ॥ ९८ ॥

अर्थः—चोरने देशपार थयो मानीने नगरमां विशेष प्रकारे जयजयकार थयो, अने कुमार पण हर्षित थयो. ॥ ९८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नरब्रह्मोऽपि सः पश्चात् सहसाङ्कं च जल्पिवान् । त्वमुद्वाहय सल्लग्ने मे पुत्रीं श्रीसमन्विताम् ॥ ९९ ॥

अर्थः—बाद नरब्रह्मराजाए सहस्रांकने कीधु के शुभ लग्ने लक्ष्मी सहित तुं मारी पुत्रीने परण ? ॥ ९९ ॥

राजानं सहसाङ्कश्च प्रोचे भाग्यपुरन्दरः । साम्प्रतं नियमः सम्यग् मया कृतोऽस्ति भावतः ॥२००॥

अर्थः—त्यारे भाग्यवान सहस्रांके कीधुं के हाल में भावथी नियम ग्रहण कर्यो छे. ॥ २०० ॥

एकदा चिन्तयामास सहसाङ्कः स्वचेतसि । मृगाङ्को मे पतिर्वर्यः समेष्यति कदाऽत्र वै ? ॥ १ ॥

अर्थः—हवे एक दिवसे स्त्रीरूपधारी सहस्रांक मनमां विचारतो हवो के मारो उत्तम एवो पति मृगांक क्यारे अहिं आवशे ? ॥ १ ॥

क्रमेण सिंहलद्वीपात् सन्मृगाङ्कः समागतः । उपविश्य तरण्डे हि भृते वस्तुविशेषकैः ॥ २ ॥

अर्थः—अनुक्रमे सिंहलद्वीपथी अनेक वस्तुओ भरीने ते सज्जन एवो मृगांक वहाणमां बेसीने आव्यो. ॥ २ ॥

सुसुमारपुरं ज्ञात्वा रक्षयित्वा च पोतकम् । तस्मादुत्तरितः श्रेष्ठी मृगाङ्को गुणनीरधिः ॥ ३ ॥

अर्थः—अने सुसुमारपुर जाणीने अहिं वहाणने थोभावीने ते गुणनिधान मृगांककुमार त्यां उतर्यो. ॥ ३ ॥

कुसुमसारस्य पुत्रो मृगाङ्कोऽत्र समागतः । कथितं सहसाङ्काग्र इति स्वानुचरेण च ॥ ४ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—त्यारे सहस्रांकना नोकरे खबर आपी के कुसुमसारनो पुत्र मृगांककुमार अहिं आवेल छे. ॥ ४ ॥

**मृगाङ्ककुमरः सोऽप्युपायनं गृहीत्वा ततः । आगतो विनयं कुर्वन् गत्या तर्जितवारणः ॥ ५ ॥**

अर्थः—बाद ते मृगांककुमार भेटणुं लेइने हस्तिनी गतिने तिरस्कारतो विनयपूर्वक त्यां आव्यो. ॥ ५ ॥

**सहसाङ्कः स्वभर्त्तारं दृष्ट्वाऽऽसनात्समुत्थितः । सन्मुखोऽपि गतस्तस्य विनयार्थं च शुद्धधीः ॥६॥ यतः-**

अर्थः—शुद्ध बुद्धिवाळो सहस्रांक पण पोताना भर्तारने जोइने विनयथी उठीने सामो गयो. ॥ ६ ॥ कह्युं छे के—

**केनाञ्जितानि नयनानि मृगाङ्गनानां, कश्चोत्पलेषु दलसञ्चयमातनोति ? ।**
**को वा करोति रुचिराङ्गरुहान् मयूरान्, को वा करोति विनयं कुलजेषु पुंसु ? ॥ ७ ॥**

अर्थः—मृगलीओनां नयनो कोणे आंज्यां छे ? कमळमां दळ–संचय कोणे कर्यो छे ? मयूरोना पीछांने कोण सुंदर बनावे छे ? अने सत्कुलमां उत्पन्न थयेला पुरुषोमां विनय कोण उत्पन्न करे छे ? ( आ बधुं स्वतः सिद्ध होय छे कोइ करवा जतुं नथी ) ॥ ७ ॥

**विनयं राजपुत्रेभ्यः पण्डितेभ्यः सुभाषितम् । अनृतं द्यूतकारेभ्यः स्त्रीभ्यः शिक्षेत कैतवम् ॥ ८ ॥**

अर्थः—राजपुत्रोथी विनय, पंडितोथी सद्वचनो, जुगारीओथी जूठुं अने स्त्रीओथी कपट शीखाय छे. ॥ ८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्यूचे सहसाङ्कोऽसो कुसुमसारनन्दनम् । तवाननं निरीक्ष्याहं हर्षितः पूर्वरागतः ॥ ९ ॥

अर्थः—बाद कुसुमसारना पुत्र मृगांकने सहस्रांके कीधुं के तारुं मुख जोइने पूर्वरागथी हुं हर्षित थाउं छुं ॥ ९ ॥

तत्कारणाद् मया मुक्तं तवार्द्धदाणमेव च । त्वां वारयाम्यहं श्रेष्ठिन् ! न कार्या दाणतस्करी ॥१०॥

अर्थः—अने ते कारणथी हुं तारुं अर्धुं दाण माफ करुं छुं, पण हे शेठ ! हुं आपने स्पष्ट कहुं छुं के दाण-चोरी करशो नहिं. ॥ १० ॥

लेखं विलिख्य वस्तूनि जग्राह शौल्किकः शुभः। लिखनादधिकं पोते, दृष्ट्वा बभूव कोपभाक् ॥११॥

अर्थः—तेना कहेवा प्रमाणे सर्व वस्तुओ नोंधीने जगात लीधो, पण लखाव्याथी वहाणमां वधारे वस्तुओ जोइने सहस्रांक कोपायमान थयो. ॥ ११ ॥

सद्यैनं बन्धयध्वं च श्रेष्ठिनं दाणतस्करम्। शौल्किकश्च हि भो लोकाः! इत्यादिशत् स्वमानुषान् ॥१२॥

अर्थः—अरे माणसो ! दाणचोरी करनार आ शेठने तुरतज बांधो ? एम ते दाणना अधिकारी सहस्रांके पोताना माणसोने हुकम कर्यो. ॥ १२ ॥

दृढं बध्ध्वा तदादेशाद् मृगाङ्कं तस्य सेवकैः । स्वगृहे च समानीतं मुषित्वा तत्तरण्डकम् ॥ १३ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते हुकमथी तेना नोकरोए मृगांकने मजबूत बांध्यो अने वहाणमांथी लूंटीने (सर्व वस्तु) घरे लाव्या. ॥१३॥

क्रोधेनाऽरुणमाकृत्य लोचनमवदत्पुनः । यष्टिमुष्टिप्रहारैश्चैनं मारयत भो जनाः ! ॥ १४ ॥

अर्थः—क्रोधावेशथी लाल आंखो बतावीने सहस्रांक वारंवार कहेवा लाग्यो के अरे माणसो ! आ शेठने लाकडी मुष्टि विगेरे प्रहारथी मारो? ॥ १४ ॥

मम चित्ते महान्कोपो वर्त्तते भो विचक्षण ! किं करोमि परं स्वामि–न्न मोक्ष्ये त्वामतः परम् ॥

अर्थः—हे विचक्षण ! मारा हृदयमां अति कोप आव्यो छे तेथी शुं करुं के तने छोडी शकुं तेम नथी. ॥ १५ ॥

इत्युक्त्वा सहसाङ्कोऽसो चचाल निजमन्दिरे ! पोतेश ! भोजनं रम्यं करिष्यसे हि मद्गृहे ॥१६॥

अर्थः—एम कहीने सहस्रांके पोताने घरे चालवा जतां पूछ्युं के हे वहाणपति ! तमो मारे त्यां मनोहर भोजन करशो ? ॥

तेनोक्तं मांडवीनाथ ! वाञ्छितं कथितं त्वया । ततः सोऽपि च तत्सार्द्धं भोजनाय गतः खलु ॥ यतः–

अर्थः—शेठे कीधुं के हे दाणना अधिकारी ! बहु सारुं, आपे योग्य कीधुं, एम कही शेठ पण तेना साथे भोजनमाटे गयो. ॥ १७ ॥ कह्युं छे के—

अभिमतमहामानग्रन्थिप्रभेदपटीयसी, गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विपुलविलसल्लज्जावल्लीवितानकुठारिका, जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥ १८ ॥

अर्थः –जेथी अभिमत मोटा मानरुप ग्रंथिना भेदनमां चतुर, अति मोटा गुणना समुदायरुप कमळने विकसित करवामां उज्वल चंद्रिकासरखी, मोटी सुशोभित लज्जारूप वल्लिने विदारण करवामां कुहाडीरुप, आ दुःखें पूराय एवी पेटरुप पेटी विडंबना करे छे. ॥ १८ ॥

सहसाङ्कः स्वहस्तेन चकाराऽथ सुभोजनम् । घृतपूरैः समायुक्तं प्राणिनां मधुरैः सदा ॥ १९ ॥

अर्थः—बाद सहस्रांके पोताने हाथे प्राणिओने हमेशां मधुर एवुं घृतथी तरबोळ करेलुं भोजन बनाव्युं. ॥ १९ ॥

तप्तिहरैश्च सत्तारैः कुष्माण्डपाककैर्वरम् । मोददं सततं रम्यं सिंहकेसरमोदकैः ॥ २० ॥

अर्थः—तापने हरवावाळो एवो उत्तम कोळांपाक तथा अनुपम सिंहकेसरीआ लाडु ताजा अने खुश करे एवा तुरत बनाव्या. ॥ २० ॥

सर्वपक्वान्नसंयुक्तं सुराणां सुरभि ध्रुवम् । हरमशेषरोगाणां कलितं लापनश्रिया ॥ २१ ॥ यतः–

अर्थः—सर्व पक्वान्नोथी मिश्रित करेल तथा खरेखर देवताओने पण सुगंधि आपनार, तेमज सर्व रोगने हरवावाळी एवी लापसी पण बनावी. ॥ २१ ॥ कह्युं छे के—



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुग्धं गोधूमचूर्णं घृतगुडसहितं नालिकेरस्य खण्डं, द्राक्षा-खर्जूर-सुण्ठि-तज-मरिचयुतं पेशलं नागपुष्पम् । पक्वं ताम्रे कटाहे तलवितमतुलं पावके मंदकान्तौ, धन्या हेमंतकाले प्रचुरघृतयुता भुञ्जते लापनश्रीः ॥ २२ ॥

अर्थः—दूध, घउंनो लोट, घी, गोळसहित नाळीएरनुं खमण, द्राक्ष, खजुर, सुंठ, तज, मरी अने नागकेसरना पुष्पोए करी युक्त, नथी देखातुं तळुं जेनुं एवी तांबानी कडाइमां मंदाग्निथी पकावेली अने घणा घीथी युक्त लापसी हेमंतऋतुमां जे माणसो खाय छे ते माणसो धन्य छे. ॥ २२ ॥

निर्मलक्षीरसत्खण्ड-प्राज्याज्यपूर्विकान्वितम् । प्रविष्टाऽन्धो-विदालिभ्यां राजितं दोषवर्जितम् ॥

अर्थः—निर्मल क्षीरथी साफ करेल छे खांड तथा घीथी परिपूर्ण करेल छे एवा मालपुडा, मीठो भात तथा चडी दाळ विगेरे दोषवर्जित रसोइथी तेने रंजित कर्यो. ॥ २३ ॥

इत्थम्भूते मनोज्ञे च क्रियमाणे सुभोजने । पूर्वः स्वादस्तदा प्राप्तः मृगाङ्केनाऽतिबुद्धिना ॥ २४ ॥

अर्थः—एवी रीतनुं उत्तम भोजन करवाथी बुद्धिशाली मृगांकने प्रथमना वखतनो स्वाद आव्यो. ॥ २४ ॥

तेनास्वादेन चित्ते च कुमारोऽवगमत्तदा । इयं पद्मावती चास्ति किंवा नास्ति च वल्लभा ॥ २५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—ते स्वादथी मृगांक मनमां विचारवा लाग्यो के आ शुं मारी स्त्री पद्मावती न होय ? ॥ २५ ॥

**या तु मया वने मुक्ता समायात्यत्र सा कथम् ? । एषस्तु शौल्किको नूनं नररूपेण दृश्यते ॥२६॥**

अर्थः—अरे ! जेणीने में वनमां छोडी दीधी छे ते अहिं क्यांथी होय ? आ तो खरेखर पुरुषरूपधारी जगातनो उपरी छे. ॥ २६ ॥

**सो भव्यं भोजनं भुक्त्वा वचसेत्यवदत्ततः । मां सहसाङ्क ! मुञ्चस्व कृपया दीनमन्दिरम् ॥२७॥**

अर्थः—उत्तम भोजन कर्या बाद मृगांके तेने विनंति करी के हे सहस्रांक ! गरीबाइना घररूप एवा मने कृपा करीने छोड ? ॥ २७ ॥

**श्रेष्ठिनं तं कलाधाम–सहसाङ्कः प्रजल्पिवान् । यावत्त्वं जीवसि भव्य ! तावत्पार्श्वं न मुच्यते ॥२८॥**

अर्थः—कलावान सहस्रांके ते शेठने कीधुं के हे भव्य ! ज्यांसुधी तुं जीवे छे त्यांसुधी तारुं पडखुं छोडी शकुं तेम नथी.

**मृगाङ्क ! त्वं सदा दीन–मन्तुमानसि मे भृशम् । तेनाहं ताडयिष्यामि महद्दण्डेन पाणिना ॥२९॥**

अर्थः—हे मृगांक ! सदा दीन एवो तुं मारो घणो अपराधी छो, तेथी मारा हस्तरूपी मोटा दंडथी तने हुं मारीश.

**श्रेष्ठिनं बन्धयित्वोर्ध्वं ताडयन्तु पुरो धृतम् । एतादृशीं मुखे भीति–मदर्शयत् पुनः पुनः ॥ ३० ॥**



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—" आ शेठने उंचे टांगो अने मारो " एवी बीक मोढेथी वारंवार आपवा लाग्यो. || ३० ||

नृपेण निजकर्णान्ते एतत्सर्वं यदा श्रुतम् । मुञ्चापितश्च वेगेन मृगाङ्कः कृपया तदा || ३१ ||

अर्थः – राजाना कर्णसुधी आ वात ज्यारे पहोंची त्यारे तुरतज मृगांकने दया लावीने छोडाव्यो. || ३१ ||

नृपस्य वचनान्मुक्तो मुत्कलो व्यावहारिकः। प्रतिज्ञामिति निश्चित्य न गन्तव्यं मया विना ||३२||

अर्थः—राजानी आज्ञाथी छुटा करेला ते शेठ साथे एवी प्रतिज्ञा करावी के मारा विना तारे (क्यांय) जवुं नहिं. ||३२||

दासो भूत्वा मृगाङ्को हि स दैन्यमदधत् तदा। अन्यतकृत्यानि नीचानि चकार सोऽपि सर्वदा ||३३||

अर्थः—मृगांक पण दीनपणे सेवक थइने रह्यो अने बीजां हलकां काम पण हमेशां ते करवा लाग्यो. || ३३ ||

एकस्मिन् दिवसे श्रेष्ठी करौ नियोज्य संस्थितः। शौल्किकेन तदा दृष्टो नयनोत्पन्नरागतः || ३४ ||

अर्थः—एक दिवसे हाथ जोडीने ते शेठ उभो, त्यारे दाणना अधिकारीए तेना तरफ राग-मिश्रित नयनोथी दृष्टी करी.

प्रसन्नचित्तं विज्ञाय विज्ञप्तिमिति सोऽकरोत् । त्वमाशु दीनसंस्त्याय-मधुना मुञ्च मां प्रति ||३५||

अर्थः—तेवुं प्रसन्न चित्त जाणीने मृगांके विनंति करी के, हवे आप आ दीनने जवा माटे तुरत छोडी मुको? ||३५||

अहं यावत् चिरं जीवी त्वां न मुञ्चामि तावतः। मन्तुमन्दिरमध्यस्थं दुष्टधीधनधारकम् || ३६ ||



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—(सहस्रांके कीधुं के) दुष्ट बुद्धिवाळा अने मारा अपराधरुपी पांजरामां पूरायेला तने हुं जीवीश त्यांसुधी छोडीश नहिं. ॥ ३६ ॥

मत्पदोर्यदि त्वं श्रेष्ठिन् ! शोषयेर्घृतमत्पलम्। सदा त्वां सादरात्सद्यो मुञ्चामि ग्रामबन्धनात् ॥३७॥

अर्थः—वळी हे शेठ! जो तुं एक पळी घी मारे पगे चोळी आप तो हुं तने आदरथी तुरतज ग्राम-बंधनथी छोडुं.

अङ्गीचकार स श्रेष्ठी पूर्वं यद् भणितं वचः। पश्चात् शय्यां महारम्यां सुप्तो हि प्रति शौल्किकः ॥३८॥

अर्थः—आ वचन शेठे अंगीकार कर्युं एटले सहस्रांक मनोहर शय्यामां सुतो. ॥ ३८ ॥

ततः परं मृगाङ्को हि चकार घृतमर्दनम्। इतः कैतवतस्तन्द्रा शौल्किकेन कृता परा ॥ ३९ ॥

अर्थः—अने मृगांक घीथी मर्दन करवा लाग्यो, दरम्यान (सहस्रांक) कपट-निद्राथी सुइ गयो. ॥ ३९ ॥

पदस्पर्शवशादाज्यं विग्घरितं च भाजने। अथ शोषमुपैति न मृगाङ्केनेति चिन्तितम् ॥ ४० ॥

अर्थः—पगना स्पर्शथी घी उनुं थवा लाग्युं पण शोषाय नहिं, तेथी मृगांके विचार्युं के, ॥ ४० ॥

घोरनिद्रावशीभूतं ज्ञात्वा शौल्किकमुद्धतम्। पश्चाद् मृगाङ्कश्रेष्ठिना दत्तमाज्यं मुखे भृशम् ॥ ४१ ॥

अर्थः—आ दाणनो अधिकारी घोरनिद्रामां छे एम जाणीने शेठे ते घी पोताना मोढामां मुकी दीधुं. ॥ ४१ ॥



86647

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सहसाङ्केन सद्यस्कं ततः क्रोधेन जल्पितम्। रे! रे! रङ्क महारङ्क! जठरस्यैव पूरकः ॥ ४२ ॥

अर्थः—त्यारे सहस्रांके क्रोध करीने कीधुं के अरे रंक! महा रंक! तुं तो पेटभरोज छे. ॥ ४२ ॥

बध्ध्वाञ्जलिं मृगाङ्को हि जल्पति प्रतिदुःखतः। तेऽहं महापराधीनो यथा रुचिस्तथा कुरु ॥ ४३ ॥

अर्थः—हाथ जोडी मृगांक दुःखथी बोल्यो के हुं आपनो महान् अपराधी छुं तो आपने योग्य लागे तेम करो? ॥४३॥

सहसांकस्तदा जातः पद्मावती मनोहरा। रचयित्वा च श्रृङ्गारं नवसप्तादिकमद्भुतम् ॥४४॥ यतः—

अर्थः—बाद सहस्रांक पण शोळे शणगार सजीने मनोहर पद्मावतीरूपे थयो. ॥ ४४ ॥ कह्युं छे के—

सोल श्रृंगार— आदौ मज्जनचारुचीरतिलकं नेत्राञ्जनं कुण्डले। नासामौक्तिकपुष्पहारधवलं झंकारकौ नूपुरौ ॥

अङ्गे चन्दनलेपकं कुचमणिः क्षुद्रावली घण्टिका। ताम्बूलं करकंकणं चतुरता श्रृङ्गारकाः षोडश ॥४५॥

अर्थः—प्रथम नहावुं, सारां लुगडां, तिलक, आंखमां अंजन, बे कुंडलो, नाकमां मोती, पुष्पनो हार, बे झांझरो, अंगे चंदननो लेप, कांचळी, नानी नानी घुघरीओ, नागरवेलनां पान, हाथमां कंकण अने चतुराइ ए शोळ शणगार स्त्रीओना छे.

पश्चात्प्रणम्य सा बाला मृगांकमिति जल्पिवान्। तेऽहं महापराधीनी पादोपानहसदृशी ॥ ४६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—पछी ते बाळाए मृगांकने प्रणाम करीने कीधुं के हुं आपनी मोटी अपराधिनी छुं अने तमारा पगनी मोजडी जेवी छुं. ॥ ४६ ॥

परस्परं स्ववृत्तान्तं श्रुत्वा सन्तोषमापतुः । नृपोऽप्येतिं प्रवृत्तिं च श्रुत्वा हर्षमुपागतः ॥ ४८ ॥

अर्थः—बाद परस्पर पोतपोतानुं वृत्तांत सांभळीने तेओ हर्षित थया, अने राजा पण आ हकीकत सांभळीने खुशी थयो.

हर्षेण तौ सुखं पश्चाद् भोजयामासतुर्मिथः । नृपेण चिन्तितं चित्ते सुतां ददामि संप्रति ॥ ४९ ॥

अर्थः—अहिं तेओ हर्षपूर्वक सुख भोगववा लाग्या, बाद राजाए विचार्युं के हवे हुं आने मारी पुत्री आपुं. ॥ ४९ ॥

धराधीशेन पुत्री सा समं तेन विवाहिता। अर्द्धराज्यं च रत्नानि स्वर्णानि च ददौ ततः ॥५०॥

अर्थः—त्यारपछी राजाए पोतानी पुत्रीने मृगांक साथे परणावी अने रत्न, सुवर्ण सहित अर्ध राज्य आप्युं. ॥ ५० ॥

दिनानि कत्यपि स्थित्वा वाराणसीं चचाल सः । प्राप्तं च तत्पुरं रम्यं स्तोकैरेव दिनैरपि ॥ ५१ ॥

अर्थः—त्यां केटलाक दिवसो रहीने ते मृगांककुमार वाराणसी नगरी प्रत्ये चाल्यो अने थोडा दिवसमां ते मनोहर नगरीमां आव्यो. ॥ ५१ ॥

मातृपित्रोः पदद्वन्द्वं नत्वा नत्वाऽतिरागतः । चकार मिलनं पश्चात् मृगांको हि परस्परम् ॥ ५२ ॥ ॥५३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः – त्यां मात–पिताना चरण–कमलने अति प्रेमथी नमीने मृगांके परस्पर मिलन कराव्युं. ॥ ५२ ॥

स्ववेश्मनि सुखं भुञ्जन् श्रेष्ठः कुसुमसारसूः । तस्थिवान् ललनाद्वन्द्वैः संयुतः स्नेहभाजनैः ॥५३॥

अर्थः—कुसुमसार शेठनो पुत्र मृगांककुमार स्नेह करवाने योग्य एवी बन्ने स्त्रीओ साथे पोताना महेलमां सुख भोगवतो थको रह्यो. ॥ ५३ ॥

इतश्च तस्यां वाराणस्यां मकरध्वजो नृपः । वर्त्तते विश्वविश्वेशः पुत्ररत्नविवर्जितः ॥ ५४ ॥ यतः–

अर्थः—ते अरसामां वाणारसी नगरीमां जगत्पति एवो मकरध्वज नामे राजा पुत्ररहित हतो. ॥ ५४ ॥ केमके–

घरअंगणंमि मसाणं जत्थ न दीसंति धूलिधूसरच्छायं ।
अडंति पडंति रडंतडाइं दो तिन्नि डिंभाइ न दीसंति ॥ ५५ ॥

अर्थः—जे घरना आंगणामां बे–त्रण छोकरा रखडतां, पडतां रडतां अने धूळथी आच्छादित थतां देखातां नथी ते घर मसाण जेवुं देखाय छे. ॥ ५५ ॥

एकोऽपि यः सकलकार्यविधौ समर्थः, सत्त्वाधिको भवति किं बहुभिः प्रसूतैः ।
तारागणः समुदितोऽप्यसमर्थ एव, चन्द्रः प्रकाशयति दिग्मुखमण्डलानि ॥ ५६ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—सघळां कार्यमां दक्ष अने सत्त्ववान एक पुत्र पण घणा पुत्रो करतां सारो, केमके असमर्थ एवा ताराओना समूह करतां एकज चंद्र दिशाओने प्रकाशित करे छे. ॥ ५६ ॥

तेन राज्ञा मृगाङ्कस्य वृत्तान्तो मूलतः श्रुतः। तदेति चिन्तितं चित्ते मत्पुत्रीशो भवत्वयं ॥ ५७ ॥

अर्थः—ते राजाए मृगांकनुं वृत्तांत अथथी इति सुधी सांभळीने मनमां चिंतव्युं के आ मारी पुत्रीनो पति थाय तो सारुं.

विचिन्त्येनि नृपेणैव स्वराज्यं च निजां सुताम्। अत्याडम्बरतो दत्वा स्वयं हि व्रतमाददे ॥ ५८ ॥

अर्थः—एम विचारीने राजाए पोतानुं राज्य पुत्रीसहित घणा आडंबरपूर्वक मृगांकने देइने पोते व्रत अंगीकार कर्युं.

पश्चान्मृगाङ्कभूपालः पालयामास राज्यतां। अनेकभटसन्दोहैः संयुतः सारविक्रमः ॥ ५९ ॥

अर्थः—बाद मृगांकभूपाल पण पराक्रमी एवा अनेक सामंतोथी परिवर्या थका राज्य करता हवा. ॥ ५९ ॥

कियत्यपि गते वर्षे ग्रामोपान्तवनान्तरे। आगता मतिपूर्णाश्च मतिसागरसूरयः ॥ ६० ॥

अर्थः—केटलाक वर्षो व्यतीत थये ते नगरीना वनमां पूर्ण मतिवाळा मतिसागर नामे सूरीश्वर पधार्या. ॥ ६० ॥

तदेत्युक्तं वनाधीशैर्गत्वा मृगाङ्कसन्निधौ। उत्तरिता वने सन्ति मतिसागरसूरयः ॥ ६१ ॥

अर्थः—त्यारे वनपाले मृगांकभूपाल पासे आवीने कह्युं के वनमां मतिसागर नामे सूरिमहाराज आवेला छे. ॥६१॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

 



तत्श्रुत्वा हृष्टमनसा मृगाङ्केनैव सत्वरम्। दत्तानि वनपालाय वस्त्राणि भूषणानि च ॥ ६२ ॥

अर्थः—ते सांभळीने हर्षित थयेलुं छे मन जेनुं एवा मृगांकभूपाले तुरतज वस्त्र अने आभूषणो वनपालने आप्यां.

ततश्चचाल तत्स्थानात् भूपालोऽद्भुतभावतः। संयुतः सर्वलोकौघैर्वन्दित्वा निषसाद सः ॥ ६३ ॥

अर्थः—त्यारबाद मृगांकभूपाल अति भावथी अने घणा लोको सहित त्यां जइने सूरिमहाराजने वांदीने यथास्थाने बेठो. ॥ ६३ ॥

पश्चात्सूरिर्महारम्या—मारेभे धर्मदेशनाम्। श्रोत्रयोः सुखदां नित्यं भव्याम्भोरुहभासिनीम् ॥६४॥

अर्थः—बाद सूरिमहाराजे पण उत्तम, कर्णने सुख आपनारी अने भविकजनरूपी कमळने विकसावनारी धर्म—देशना आपवा मांडी. ॥ ६४ ॥

देशनान्ते मृगाङ्कोऽपि पप्रच्छ स्वामिनं प्रति। कथं लब्धा गता लक्ष्मीः पुनः प्राप्तेति कारणं ॥६५॥

अर्थः—देशना बाद मृगांकभूपाले सूरिमहाराजने पूछ्युं के शुं कारणथी मने मळेली लक्ष्मी गइ अने पाछी फरीने ते प्राप्त थइ ? ॥ ६५ ॥

स्वाम्यूचे भववृत्तान्तं पुरे गुणपुराभिधे। हंसपालाभिधो क्षत्री पत्नी लीलावती वरा ॥ ६६ ॥ 

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—त्यारे गुरुमहाराजे पण तेना पूर्वभवनुं वृत्तांत कीधुं के—गुणपुर नामे नगरमां हंसपाल नामे क्षत्री रहेतो हतो, तेनी लीलावती नामे उत्तम स्त्री हती. ॥ ६६ ॥

एकस्मिन् वासरे त्वं हि परदेशेषु जग्मिवान्। धनोपार्जनकार्यार्थ—मुत्कलाप्य मृगेक्षणाम् ॥ ६७ ॥

अर्थः—एक दिवसे हंसपाल स्त्रीने कहीने धन उपार्जन करवामाटे परदेशमां गयो. ॥ ६७ ॥

भ्रमितः सर्वदेशे त्वं नाप्तं किंचिद् धनं त्वया। पश्चात् त्वं प्रतिसंस्त्यायं चलितः प्रेमप्रेरितः ॥६८॥

अर्थः—सर्व देशमां फर्यो, पण तेने क्यांय धन प्राप्त न थवाथी प्रेमथी प्रेरायेलो एवो ते पोताना घर तरफ पाछो वळ्यो.

मार्गेऽप्यागच्छता दृष्टः श्वेतपुष्पपलाशकः। तन्मूले खनिते आप्तं भाण्डं द्रव्यसमन्वितम् ॥ ६९ ॥

अर्थः—मार्गमां चालतां तेणे धोळां पुष्पोवाळुं खाखरानुं झाड दीठुं, तेना मूळमां खोदवाथी द्रव्यथी भरेलुं एक ठाम मल्युं. ॥ ६९ ॥

क्रमेण सदने गत्वा कान्तायै भाण्डमर्पितम्। सा प्राप परमानन्दं विवेकविनयान्विता ॥ ७० ॥

अर्थः—अनुक्रमे पोताने घरे जइने स्त्रीने ते ठाम आप्युं तेथी तेणी पण विवेक अने विनयपूर्वक परम आनंदित थइ.

तया हि परमान्नं च कृतं भोजनमुत्तमम्। तस्मिन् मासोपवासी चा—ऽगतः सद्मनि पुण्यतः ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—तेणीए दूधपाकनुं उत्तम भोजन बनाव्युं, ते अरसामां तेमना पुण्योदयथी मासोपवासी साधु तेमने घरे आवी चड्या. ॥ ७१ ॥

ततो भूयोऽर्थयित्वा च प्रदत्तं क्षीरभोजनम् । पश्चादिति कुभावश्च जातो दत्तं मया वृथा ॥ ७२ ॥

अर्थः—त्यारे लीलावतीए वारंवार प्रार्थना करीने ते दूधपाक वोरावी दीधो. पाछळथी तेणीने कुमनोरथ थयो के में फोगट आ ( उत्तम भोजन ) आपी दीधुं. ॥ ७२ ॥

हंसपालेन तेनापि कुभाव इति चिन्ततः । धिक् कान्ते ! मां हि मुक्त्वा च प्रदत्तं भोजनं मुनेः ॥

अर्थः– बाद हंसपाले पण कुमनोरथ चिंतवतां थकां कीधुं के हे प्रिया ! तने धिकार छे के मने मूकीने तें बधुं भोजन साधुने आपी दीधुं. ॥ ७३ ॥

पुनर्द्वन्द्वस्य सद्भावः समुत्पन्नः समं हृदि । इदं वर्यं कृतं कान्ते ! परस्परं प्रशंसतः ॥ ७४ ॥

अर्थः—वळी फरीने बन्नेना हृदयमां सद्भाव आव्यो के हे प्रिया ! आ उत्तम काम थयुं, एम परस्पर प्रशंसा करवा लाग्या.

सम्यक्त्वमूलमापन्नौ क्रमेण गुरुसन्निधौ । धर्मकृत्यान्वितौ जातौ द्वावपि सततं तदा ॥ ७५ ॥

अर्थः—त्यारबाद अनुक्रमे ते बन्नेए गुरुपासेथी सम्यक्त्व अंगीकार कर्युं, अने बन्ने हमेशां धर्म-कृत्यमां तत्पर थया.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तौ च सुरागारे पालयित्वा निजायुषम् । जग्मतुर्द्वौ सदाकारौ पूर्वपुण्यानुभावतः ॥ ७६ ॥

अर्थः— बाद ते बन्ने स्वायुः पूर्ण करीने पूर्वे करेलां पुण्योदयथी देवलोकमां उत्पन्न थया. ॥ ७६ ॥

देवलोकान्मृगाङ्कत्वे—नोत्पन्नः श्रेष्ठिनो गृहे । लीलावत्यपि संजाता श्रेष्ठिनः सदने सुता ॥७७॥

अर्थः—देवलोकमांथी चवीने तुं ( कुसुमसार ) शेठने घरे मृगांकपणे थयो, अने लीलावती पण श्रेष्ठि—गृहे पुत्रीरूपे थइ.

पूर्वरागेण सम्बन्धो मिलितो हि परस्परम् । पात्रदानात्सुखमाप्त—मसुखं तु कुभावतः ॥ ७८ ॥

अर्थः—पूर्वना रागथी तमारो संबंध परस्पर मल्यो, पात्र—दानथी सुख मल्युं अने कुमनोरथथी असुख प्राप्त थयुं. ॥७८॥

पुनः सुखं हि सद्भावात् संप्राप्तं वसुधाधिप ! । देशनामिति श्रुत्वा स धर्मं चकार भावतः ॥७९॥

अर्थः—वळी हे राजन ! उत्तम भावथी फरीने सुख मल्युं. एवी रीतनी धर्म—देशना सांभलीने ते मृगांकभूपाल भाव-पूर्वक धर्मोद्यम करतो हवो. ॥ ७९ ॥

जीर्णोद्धारप्रतिष्ठादि जिनबिम्ब—जिनालयम् । इत्यादिधर्मकृत्यानि चकार धरणीपतिः ॥ ८० ॥

अर्थः—जीर्णोद्धार, जिन—बिंब, जिन—प्रतिष्ठा अने जिन—मंदिर विगेरे धर्म—कृत्यो मृगांकभूपाल करतो हवो. ॥८०॥

एकस्मिन् समये च्युत्वा द्वादशे हि दिवालये । द्वावपि दुष्टसंसाराद् जग्मतुः सुखहेतवे ॥ ८१ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—समयांतरे मृगांकभूपाल अने तेनी स्त्री आ दुष्ट संसारथी चवीने सुखमाटे बारमे देवलोके गया. ॥ ८१ ॥

पुनः स्वर्गात् समागत्य भुक्त्वा च मानुषं भवं । मृगाङ्को मुक्तिगेहे हि मानिन्या सह यास्यति ॥८२॥

अर्थः—वळी स्वर्गथी चवीने मनुष्यभव भोगवीने मृगांकनो जीव स्त्री सहित मोक्षे जशे. ॥ ८२ ॥

एवं विभाव्य भो भव्याः ! दानं दत्त सुभावतः । पात्रापात्रे यथा शक्त्या निदानं सुखसन्ततेः ॥

अर्थः—ए प्रमाणे जाणीने हे भव्य लोको ! पात्रापात्रनो विचार करीने शक्ति प्रमाणे सुख—संततिना कारणभूत एवुं दान सद्भावथी आपवुं ॥ ८३ ॥

श्रीमत्तपगणगगने गगनमणिर्विजयसेनसूरीशः । तस्यानुक्रमपट्टे गुरुर्विजदेवसूरिवरः ॥ ८४ ॥

अर्थः—श्रीमत्तपागच्छरूपी आकाशमां सूर्यसमान विजयसेनसूरीश्वर नामे आचार्य थया, तेनी पाटे अनुक्रमे विजयदेवसूरीश्वर थया. ॥ ८४ ॥

तद्गच्छे सततं जयन्तु सुखदाः श्रीभानुचन्द्राश्चिरम् । षण्मासाऽभयदायकाः क्षितिपतिं दिल्लीपतिं पेशलम् ॥ सद्वाग्भिः प्रतिबोध्य शास्त्रजलधेः पारंगता भूतले । तीर्थेशाऽकरकारका गतगदाः प्राग्भारपुण्योत्कराः ॥ ८५ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—तेमनी पाटे उत्तम एवा दिल्लीपति ( अकबर ) ने मनोहर वाणीथी बोधीने छ माससुधि अमारी पळावनार, शास्त्ररूपी समुद्रनो पार पामेला, पृथ्वीपर रहेला तीर्थोना करने छोडावनारा, गया छे रोगो जेना अने महोटा पुण्यना उत्कर्षने करवावाळा तेमज सुख आपनारा श्री भानुचंद्रोपाध्याय हमेशां जयवंता वर्त्तो ? ॥ ८५ ॥

तस्य वर्यपदाम्भोज–शिलीमुखानुकारिणा ।
सपर्यासक्तचित्तेन ऋद्धिचन्द्रेण निर्मितम् ॥ ८६ ॥

अर्थः—तेमना उत्तम एवा चरणकमळमां आसक्त चित्ते भ्रमरनुं अनुकरण करनार श्री ऋद्धिचंद्र ( महाराजे ) आ चरित्र रच्युं. ॥ ८६ ॥

इदं विश्वे प्रसिद्धस्य भावाम्भोरुहभास्वतः ।
सच्चरित्रं मृगाङ्कस्य श्लोकाभ्यासनहेतवे ॥ ८७ ॥

अर्थः—आ जगत्प्रसिद्ध एवुं अने भावरूपी कमळने विकसावनारुं श्री मृगांकनुं चरित्र श्लोकना अभ्यास माटे बनाव्युं.

पण्डितव्राजकोटीरैरुदयचन्द्रधीधनैः ।
शुद्धीकृतमिदं सम्यक् चरित्रं चित्तसातकृतम् ॥ ८८ ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अर्थः—पंडितोना समूहमां मुकुटसमान, बुद्धिरूपी धनवाळा एवा श्री उदयचंद्र (महाराजे) चित्तने शांत करनारुं आ चरित्र सम्यक्प्रकारे शुद्ध कर्युं छे. ॥ ८८ ॥

## ॥ इति श्री मृगाङ्कचरित्रं सार्थं समाप्तम् ॥

आ ग्रंथनी मूळ प्रति तथा अर्थनी एक चोपडी मुनिमहाराज श्रीविनोदविजयजीना शिष्य मुनिश्री वीरविजयजी महाराज पासेथी मळेल तेथी तेमनो आभार मानी ते उपरथी यथामति अर्थ करीने प्रत आकारे अमारा "सूर्योदय प्रिन्टिंग प्रेस–जामनगर" मां स्वपरना श्रेयार्थे छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

ली. विठलजी हीरालाल हंसराज.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

॥ इति श्री मृगांकचरित्रं सार्थं समाप्तम् ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust